

पण्डिताशाधरविरचिता

# त्रिषष्टिस्मृतिः

(सह टिप्पण्या)

पण्डिताशाधरविरचिता

# ॥त्रिषष्टिस्मृतिः॥

(सह टिप्पण्या)

श्रुतभवनसंशोधनकेन्द्रम्
पुणे

**श्रुतदीपग्रन्थश्रेणिः ३३**

| | | |
|---|---|---|
| **ग्रंथनाम** | - | त्रिषष्टिस्मृतिः |
| **मूलकर्ता** | - | पण्डित आशाधर |
| **विषय** | - | कथाचरित्र |
| **सम्पादक** | - | मुनिवैराग्यरतिविजयगणी |
| **सह सम्पादक** | - | कृष्णा भगवान माळी |
| **प्रकाशक** | - | श्रुतदीप रिसर्च फाउंडेशन - श्रुतभवन संशोधन केंद्र, पुणे |
| **पत्र** | - | ४८ + १०४ = १५२ |
| **आवृत्ति** | - | प्रथम, वि.सं.२०७५, ई.२०१९ |
| **मूल्य** | - | १०० रु. |
| **स्वामित्व** | - | श्रमणसंस्थाधीनश्रुतदीपानुसन्धानसंस्थानम्। |
| ISBN | - | 978-81-942664-0-2 |

**-: प्राप्तिस्थल :-**

| | | |
|---|---|---|
| **पुणे** | : | **श्रुतभवन संशोधन केन्द्र**<br>४७/४८ अचल फार्म, आगम मंदिर से आगे,<br>सच्चाई माता मंदिर के पास, कात्रज, पुणे-४११०४६<br>Mo.7744005728 (9-00am to 5-00pm)<br>www.shrutbhavan.org Email : shrutbhavan@gmail.com |
| **अहमदाबाद** | : | **श्री उमंगभाई शाह**<br>बी-४२४, तीर्थराज कॉम्प्लेक्स, वी. एस. हॉस्पिटल के सामने<br>मादलपुर, अहमदाबाद. मो.०९८२५१२८४८६ |
| **मुंबई** | : | **श्री गौरवभाई शाह**<br>सी/१११, जैन एपार्टमेंट, ६० फीट रोड,<br>देवचंद नगर रोड, भायंदर (वेस्ट)<br>मुंबई-४०११०१. मो.०९८३३१३९८८३ |
| **सुरत** | : | **श्री सेवंतीलालभाई मेहता**<br>ओंकारसूरि ज्ञानमंदिर, सुभाष चौक,<br>गोपीपुरा, सुरत - ३९५००१ मो. ९८२४१५२७२७ |
| **मुद्रण** | : | **नूतन आर्ट,** अहमदाबाद |

# प्रकाशकीय

पंडित **आशाधर** विरचित **त्रिषष्टिस्मृति** श्रीसंघ के करकमल में समर्पित करते हुए हमे आनन्द की अनुभूति हो रही है। श्रुतभवन संशोधन केन्द्र के सन्निष्ठ समर्पित सहकारिगण की कडी महेनत और लगन से यह दुर्गम कार्य सम्पन्न हुआ है। इस अवसर पर श्रुतभवन संशोधन केन्द्र के संशोधन प्रकल्प हेतु गुप्तदान करने वाले दाता एवं श्रुतभवन संशोधन केन्द्र के साथ प्रत्यक्ष-अप्रत्यक्ष रूप से जुडे हुए सभी महानुभावों का हार्दिक अभिनन्दन करते हैं। हम उन संस्था एवं विद्वानों के भी आभारी है जो हमें मार्गदर्शन और सहाय करते हैं।

इस ग्रन्थ के प्रकाशन का अलभ्यलाभ पूज्यपाद शासनप्रभावक आचार्य भगवंत श्री **राजरत्नसूरीश्वरजी** म.सा.की प्रेरणा से **श्री शंखेश्वर पार्श्वनाथ श्वेतांबर मूर्तिपूजक तपगच्छ संघ, घाटकोपर (पूर्व) मुंबई** ने ज्ञानद्रव्य से प्राप्त किया है। आपकी अनुमोदनीय श्रुतभक्ति के लिये हम आपके आभारी है।

**डॉ. जितेंद्र शाह**
(मानद विश्वस्त)

**सम्पादकमण्डलम्**

**मुनिश्रीवैराग्यरतिविजयगणी** (अभिवीक्षकः)

**डॉ. विनया क्षीरसागर** (मार्गदर्शिका) **अमित उपाध्ये** (विभागप्रमुखः)

**कृष्णा माळी** (प्रकल्प प्रमुखः) **अतुल मस्के** (सहायकः)

**विनय गायकवाड** (सहायकः) **मञ्जुनाथ भट्टः** (सहायकः)

**वर्धमानजिनरत्नकोशविभागः** (सहायकः)

# **શ્રુતપ્રેમી**

યુગદિવાકર પૂજ્યપાદ આચાર્યદેવ

શ્રીમદ્ વિજય **ધર્મસૂરીશ્વરજી** મ.સા.ના શિષ્યરત્ન

પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્ વિજય **સૂર્યોદયસૂરીશ્વરજી**

મહારાજ સાહેબના

પૂજ્યપાદ શાસનપ્રભાવક આચાર્ય ભગવંત

શ્રી **રાજરત્નસૂરીશ્વરજી** મ.સા.ના

યશસ્વી ચાતુર્માસમાં થયેલ ૧૧૫ માસ ક્ષમણતપની અનુમોદનાર્થે

**શ્રી શંખેશ્વર પાર્શ્વનાથ શ્વેતાંબર મૂર્તિપૂજક તપગચ્છ સંઘ**

ઘાટકોપર (પૂર્વ) મુંબઈ

# अनुक्रमणिका


| | | |
|---|---|---|
| सम्पादकीयम् | कृष्णा माळी | ( 7-12) |
| प्रास्ताविकम् | कृष्णा माळी | (13-27) |
| प्रस्तावना | कृष्णा माळी | (28-47) |


**॥त्रिषष्टिस्मृतिः॥**


| | | श्लोकाङ्कः | पत्राङ्कः |
|---|---|---|---|
| १. | श्रीवृषभतीर्थङ्कर-भरतेश्वरचक्रिणोरितिवृत्तं प्रथमम्। | १-४० | ३-९ |
| २. | श्रीअजितजिन-सगरचक्रिणोरितिवृत्तोत्तरं द्वितीयम्। | ४१-४७ | ९-१० |
| ३. | श्रीशम्भवजिनस्येतिवृत्तं तृतीयम्। | ४८-५० | १०-१० |
| ४. | श्री-अभिनन्दनजिनस्येतिवृत्तं चतुर्थम्। | ५१-५३ | ११-११ |
| ५. | श्रीसुमतिजिनस्येतिवृत्तं पञ्चमम्। | ५४-५६ | ११-११ |
| ६. | श्रीपद्मप्रभजिनस्येतिवृत्तं षष्ठम्। | ५७-५९ | ११-१२ |
| ७. | श्रीसुपार्श्वजिनस्येतिवृत्तं सप्तमम्। | ६०-६२ | १२-१२ |
| ८. | श्रीचन्द्रप्रभजिनस्येतिवृत्तम् अष्टमम्। | ६३-७२ | १२-१३ |
| ९. | श्रीपुष्पदन्तजिनस्येतिवृत्तं नवमम्। | ७३-७५ | १३-१४ |
| १०. | श्रीशीतलजिनस्येतिवृत्तं दशमम्। | ७६-७९ | १४-१४ |
| ११. | श्रीश्रेयोजिनाश्वग्रीवप्रतिवासुदेव-विजयबलदेव-त्रिपृष्ठवासुदेवानाम् इतिवृत्तम् एकादशम्। | ८०-८९ | १४-१६ |
| १२. | श्रीवासुपूज्यजिन-तारकप्रतिवासुदेवाचलबलदेव-द्विपृष्ठवासुदेवानाम् इतिवृत्तं द्वादशम्। | ९०-९८ | १६-१७ |
| १३. | श्रीविमलजिन-धर्म-स्वयम्भू-मधुवृत्तगर्भं मेरकप्रतिवासुदेव-भद्रबलदेव-स्वयम्भूवासुदेव-सञ्जयन्त-मेरु-मन्दराणाम् इतिवृत्तं त्रयोदशम्। | ९९-११४ | १७-२० |

| | | | |
|---|---|---|---|
| १४. | श्रीअनन्तजिन-मधुसूदनप्रतिवासुदेव- सुप्रभबलदेव-पुरुषोत्तमवासुदेवानाम् इतिवृत्तंचतुर्दशम्। | ११५-१२४ | २०-२१ |
| १५. | श्रीधर्मजिन-मधुक्रीडप्रतिवासुदेव-सुदर्शनबलदेव-पुरुषसिंहवासुदेव-मघवचक्रि-सनत्कुमारचक्रिणाम् इतिवृत्तं पञ्चदशम्। | १२५-१४१ | २१-२३ |
| १६. | इति श्रीशान्तिजिनचक्रिण इतिवृत्तं षोडशम्। | १४२-१६२ | २४-२७ |
| १७. | श्रीकुन्थुजिनचक्रिण इतिवृत्तं सप्तदशम्। | १६३-१६६ | |
| १८. | श्री अरजिनचक्रि-सुभौमचक्रि-नन्दिषेणबलदेव-पुण्डरीकवासुदेव-तच्छत्रुनिसुम्भानाम् इतिवृत्तम् अष्टादशम्। | १६७-१९२ | २७-३१ |
| १९. | श्रीमल्लिजिन-पद्मचक्रि-नन्दिमित्र-रामदत्ताख्यकेशव-तच्छत्रुबलीन्द्रचरितावसानमेकोनविंशम्। | १९३-२०६ | ३१-३३ |
| २०. | श्रीमुनिसुव्रतजिन-हरिषेणचक्रि-रावणप्रतिवासुदेव-रामबलदेव-लक्ष्मणवासुदेवानाम् इतिवृत्तं विंशम्। | २०७-२८७ | ३४-३६ |
| २१. | श्रीनमिजिन-जयसेनचक्रिणोरितिवृत्तम् एकविंशम्। | २८८-२९५ | ४६-४७ |


## ॥कंसकथासङ्ग्रहः॥


| | | | |
|---|---|---|---|
| २२. | श्रीनेमिजिन- जरासन्धप्रतिवासुदेव-पद्मबलदेव-कृष्णवासुदेव-ब्रह्मदत्तचक्रिणाम् इतिवृत्तं द्वाविंशम्। | २९६-३९६ | ४७-६२ |
| २३. | श्रीपार्श्वजिनस्येतिवृत्तं त्रयोविंशम्। | ३९७-४२८ | ६३-६७ |
| २४. | श्रीमहावीरजिनस्येतिवृत्तं चतुर्विंशम्। | ४२९-४८० | ६७-७४ |
| | प्रशस्तिः | ४८१-४९५ | ७४-७७ |


## परिशिष्टानि


| | | |
|---|---|---|
| १. | त्रिषष्टिस्मृतिग्रन्थगतानां विशेषनाम्नां सूचिः। | ७८-८७ |
| २. | त्रिषष्टिस्मृतिग्रन्थस्य विषयसारणिः। | ८८-९० |
| ३. | सङ्केतसूचिः। | ९१-९१ |
| ४. | सम्पादकीये निर्दिष्टानि हस्तलिखितपत्राणि | ९२-९४ |
| ५. | सन्दर्भग्रन्थसूचिः। | ९५-९७ |

# सम्पादकीयम्

## सम्पादनविषयः—

अस्मिन् सम्पादने पण्डिताशाधरकृता त्रिषष्टिस्मृतिः प्रस्तूयते। ग्रन्थोऽयं विंशतिसहस्रश्लोकप्रमाणस्य महापुराणस्य सङ्क्षेपरूप इति। ग्रन्थेऽस्मिन् त्रिषष्टिशलाकापुरुषाणां चरितं सङ्क्षेपतो निर्वर्णितम्।

## सम्पादनप्रयोजनम्—

ईसवीये सप्तत्रिंशदधिकैकोनविंशतितमे(१९३७) वर्षे माणिकचन्ददिगम्बरजैनग्रन्थमालायां(हिराबाग, मुम्बई, अनु.३६) प्रकाशितपूर्वोऽप्ययं ग्रन्थो दुर्लभत्वात् पुनः सम्पाद्य प्रकाश्यते। तत्र मूलग्रन्थ एव प्रकाशितः। अत्र पुनः टिप्पणीसहितः प्रकाश्यत इत्ययमस्य विशेषः।

## सम्पादनसामग्री—

**जिनरत्नकोशे**[1] त्रिषष्टिस्मृतिनामिकायाः कृतेः द्वे एव हस्तलिखिते उपलभ्येते। एकं पुण्यपत्तनस्थिते **भाण्डारकर-प्राच्यविद्या-संशोधन-केन्द्रे**(५-११०७) वर्तते अन्यच्च **इलादुर्गस्थे(इडर) नाम्ना हस्तप्रतभण्डारे(क्र.१८)** वर्तते। अस्मिन् हस्तलिखिते स्वोपज्ञ-पञ्जिकाटीकापि वर्तते। टीका अद्यावधिरप्रकाशिता वर्तते। तस्याश्च एकमेव हस्तलिखितमुपलभ्यते।

इदं सम्पादनं **भाण्डारकर-प्राच्यविद्या-संशोधन-केन्द्रीय**हस्तलिखितानुसारेण कृतम्। कृतेऽपि प्रयासे इलादुर्गस्थं हस्तलिखितं नोपलब्धमिति मन्दभाग्या वयम्।

## हस्तलिखितपरिचयः—

हस्तलिखितमेतत् पुण्यपत्तनस्थे **भाण्डारकरप्राच्यविद्यासंशोधनकेन्द्रे** वर्तते। क्रमाङ्कोऽस्य— ८४(सन्दर्भाङ्कः-१८८४-८७/११०७)।

---

१ सम्पादकः- प्रो. हरी दामोदर वेलणकर, प्रकाशकः- भाण्डारकरप्राच्यविद्यासंशोधनकेन्द्रम्, पुणे।

## हस्तलिखितस्य बाह्यं स्वरूपम्—

अस्य हस्तलिखितस्य मृदुप्रतिरेव(soft copy) उपालभ्यत अस्माभिरतोऽस्या आकारादिविषये वक्तुमसमर्था वयम्। कर्गजस्य प्राचीनदेवनागरीलिपौ लिखितस्यैतस्य हस्तलिखितस्य सप्तत्रिंशत् पत्राणि सन्ति। प्रतिपत्रम् अष्टौ पङ्क्तयः प्रतिपङ्क्ति च एकत्रिंशदक्षराणि सन्ति। हस्तलिखितस्य स्थितिरुत्तमास्ति। एतद् हस्तलिखितं पूर्णं शुद्धं च वर्तते। प्रतिलेखकस्य आदिमङ्गलवाक्यमेवमस्ति- **'ॐ नमः सिद्धेभ्यः'** इति। प्रतिलेखकस्य अन्तिममङ्गलवाक्यं नास्ति।

अन्तिमे पत्रे प्रतिलेखनप्रशस्तिरेवम्— ***संवत् १५९४ वर्षे फाल्गुनमासे १२ द्वादशी तिथौ रविवारे पुन-र्वसुनक्षत्रे श्रीमूलसङ्घे नन्दिसङ्घे बलात्कारगणे सरस्वतीगच्छे श्रीकुन्दकुन्दाचार्यान्वये भट्टारकश्रीपद्मनन्दिदेवास्तत्पट्टे भ. श्रीशुभचन्द्रदेवास्तत्पट्टे भ. श्रीजिनचन्द्रदेवास्तत्पट्टे भ. श्रीप्रभाचन्द्रदेवास्तच्छिष्यमण्डलाचार्य श्रीधर्मचन्द्रदेवास्तन्मुख्यशिष्याचार्यश्रीनेमिचन्द्रदेवास्तैरियं त्रिषष्ठिस्मृतिर्लिखापिता ज्ञानावरणादिकर्मक्षयार्थमात्मनः पठनार्थमिति।***

ग्रन्थरचनानन्तरं द्व्यधिकत्रिशतेषु(३०२) वर्षेषु व्यतीतेषु लिखितास्ति प्रतिरेषा। प्रतिलेखकस्य नाम न विद्यते। आचार्यनेमिचन्द्रदेवैर्लिखापितैषा प्रतिः। अस्य प्रथमादर्शस्तु खाण्डिल्यवंशीयमहण-कमलश्रीसुतेन धीनाकेन नलकच्छपुरे श्रीमन्नेमिचैत्यालये एकोनत्रिंशदधिकद्वादशशततमे वर्षे लिखित इति ग्रन्थगतान्तिमपद्याभ्यां ज्ञायते।[१]

पत्रस्य दक्षिणार्धे अधोभागे पत्राङ्को विद्यते। पत्राङ्क आदौ केवल ब भागे लिखितोऽस्ति अनन्तरं केनापि अभागेऽपि अङ्को दत्त इति प्रतिभाति।

## हस्तलिखितस्यान्तरङ्गं स्वरूपम्—

प्रकरणसमाप्तिसूचकं **॥छ॥** इति चिह्नं सर्वत्र दृश्यते। तत्रैव प्रकरणस्य

---

१ नलकच्छपुरे श्रीमन्नेमिचैत्यालयेऽसिधत्।
ग्रन्थोऽयं द्वि-नव-द्व्ये कविक्रमार्कसमात्यये॥१३॥
खण्डिल्यवंशे महणकमलश्रीसुतः सदृक्।
धीनाको वर्धतां येन लिखितास्याद्यपुस्तिका॥१४॥

क्रमाङ्कोऽपि दत्तः। नूतनप्रकरणस्यारम्भे किमपि चिह्नादिकं न प्रयुक्तम्। गाथान्ते दण्डद्वयं दत्तम्।

**हस्तलिखित उपायोजितानि विशिष्टचिह्नानि—**

१. अवग्रहार्थं ऽ एतादृशं चिह्नं कृतम्।

२. पदच्छेदार्थम् अक्षरस्योपरि लघ्वी ऊर्ध्वरेखा दत्ता।

३. सामासिकपदेषु क्वचित् सन्देहसम्भावनायां विभक्तिदर्शकाङ्कोऽक्षरोपरि निक्षिप्तः। यथा— तृतीयपत्रे(ब) प्रथम पङ्क्तौ प्रभाकर्या इत्यस्य शब्दस्योपरि ६ १ इत्यङ्कोऽस्ति। तस्यार्थोऽस्ति— प्रभाकरी इत्यस्य शब्दस्य षष्ठी एकवचनं ग्राह्यम्।

४. सञ्ज्ञावाचकनाम्नां सङ्ख्यापरिचयार्थं शब्दानामुपरि अङ्का न्यस्ताः। यथा— द्वितीये पत्रे(ब) सप्तमाष्टमपङ्क्त्योः; तृतीये पत्रे(अ) प्रथमपङ्क्तौ एकादशराज्ञां नामानि सन्ति।

**४. सन्धिनिर्देशार्थं दत्तानि चिह्नानि—**

अवर्णार्थम् ऽ अवग्रहचिह्नमक्षरोपरि।(द्रष्टव्यम्— पत्रं १(ब) तृतीया पङ्क्तिः) अनुस्वारसहितस्यावर्णार्थम् अनुस्वारसहितम् अवग्रहचिह्नमक्षरोपरि।(द्रष्टव्यम्— पत्रं १(ब) प्रथमा पङ्क्तिः)

आवर्णार्थम् x चिह्नमक्षरोपरि। (द्रष्टव्यम्— पत्रं १(ब) चतुर्थी पङ्क्तिः)

इवर्णार्थम् ॅ चिह्नमक्षरोपरि। (द्रष्टव्यम्— पत्रं २(अ) तृतीया पङ्क्तिः)

ईवर्णार्थमपि तदेव चिह्नम् आद्वादशं(ब) पत्रम्(द्वितीया पङ्क्तिः)। ततः परं ईवर्णार्थम् ी चिह्नमक्षरोपर्युपन्यस्तम्।(द्रष्टव्यम्—पत्रं १२(ब) चतुर्थी पङ्क्तिः)

उवर्णार्थं शिरोरेखारहित उकारोऽक्षरोपरि। (द्रष्टव्यम्— पत्रं १(ब) पञ्चमी पङ्क्तिः)

ऊवर्णार्थं शिरोरेखारहित ऊकारोऽक्षरोपरि। (द्रष्टव्यम्— पत्रं ११(अ) चतुर्थी पङ्क्तिः)

ऋवर्णार्थं शिरोरेखारहित ऋकारो[१]ऽक्षरोपरि। (द्रष्टव्यम्— पत्रं ५(ब) सप्तमी पङ्क्तिः)

---

१ प्राचीनदेवनागरीलिपेः।

एवर्णार्थं शिरोरेखारहित एकारोऽक्षरोपरि। (द्रष्टव्यम्—पत्रं २(अ) प्रथमा पङ्क्तिः)

प्रतिरेषा संशुद्धा वर्तते। लेखनदोषा व्याकरणदोषाश्च बहुधा न सन्ति।

पुस्तकेऽस्मिन् पाठकसौकर्यार्थं कर्तृपरिचय-ग्रन्थरचनाप्रयोजन-रचनास्थलादिविषयाः प्रास्ताविक एव प्रस्तुताः। संस्कृतभाषानभिज्ञानां कृते प्रास्ताविकस्य हिन्द्यनुवादोऽपि विहितः।

**सम्पादनपद्धतिः**—

१) अत्राशुद्धत्वेनोपलक्षितः पाठः संशोध्य तत्रैव वृत्ताकारे () कोष्ठके शुद्धः पाठो दर्शितः। यत्रापि च पाठे स्वल्पोऽपि सन्देहः तत्र प्रश्नचिह्नं कृतम्।

२) लिपिकृतोऽनवधानादिना भ्रष्टः पाठः चतुष्कोणे [ ] कोष्ठके दर्शितः।

३) पुनरावृत्तः पाठः धनुराकारे { } कोष्ठके दर्शितः। अत्र तु तादृशः पाठो नोपलभ्यते।

४) सर्वथा सन्दिग्धाः पाठा अधोरेखयाङ्किताः।

५) परिशिष्टनिर्माणार्थं च श्लोकानां निरन्तरक्रमः कल्पितः। स च चतुष्कोणे [ ] कोष्ठके न्यस्तः।

६) सामान्यतो ग्रन्थोऽयमनुष्टुप्छन्दसि वर्तते। अनुष्टुपातिरिक्तछन्दसाम् नामान्यपि चतुष्कोणे [ ] कोष्ठके न्यस्तानि।

७) पाण्डुलिपौ समासभागे[१] ग्रन्थकृता प्रतिलेखकेनान्येन वा केनचित् टिप्पण्यो नियोजिताः। कुत्रचित् पुनर्द्वयोः पङ्क्त्योर्मध्यभाग एव ता लिखिताः। अमूः टिप्पण्यः पादटिप्पणीरूपेण प्रकाशिताः। पत्रस्य त्रुटितत्वेन भ्रष्टः पाठो यथामति पूरितः। सर्वथानवगम्यमानः पाठो रिक्तस्थानेन सूचितः। तत्र यावन्त्यक्षराणि न पठ्यन्ते तावन्ति लघुरेखाचिह्नानि(dash -) स्थापितानि।

८) सम्पादककृताः टिप्पण्यः वाक्यान्ते **सं.** सङ्केतपूर्वकं प्रदर्शिताः।

९) ग्रन्थेऽस्मिन् लिपिदोषजन्यानां क्वचिदेव व्याकरणदोषजन्यानामशुद्धानाम् अर्थदृष्ट्यासङ्गतत्वेन सम्भाव्यमानानां च पाठानां यथामति सम्मार्जनं विहितम्। तच्च यथाक्रममुपदर्श्यते।

---

१ पत्रस्य परितो वर्तमानस्य रिक्तस्थानस्य समास इति सञ्ज्ञा। हांसियो इति भाषायाम्।

## लेखनदोषाणां संशोधनम्—

(१) त्रिषष्ठि(ष्टि)। (श्लोक-१)[१], (२) बध्वा(द्ध्वा)।[२] (श्लोक-४१,७०,८१,११६,१२६,३२५,४५१), (३) लब्धा(ब्ध्वा)।[३] (श्लोक-१६९), (४) पत्तिवृत्या(त्त्या?)[४]। (श्लोक-३२१), (५) सोऽवधीक्र(त्क्र)[५]मात्। (श्लोक-३३४), (६) भुग्ण(ग्न)।[६] (श्लोक-३३८), (७) श्रित्वापाग्मथुरामभुः(भूः)। (श्लोक-३८९), (८) निग्र(ग्रं)न्थाः। (श्लोक-३९०,४३८,४७५), (९) क्ष(क्षि)तिम्। (श्लोक-३९४) (१०) समुर्द्ध(द्ध)र्तुम्।[७] (श्लोक-४०६), (११) ध्यायन्नश्च(श्व)वने। (श्लोक-४२४), (१२)विदू(ह)त्य। (श्लोक-४२४), (१३) नरकीनरयो(पो)ऽथ। (श्लोक-४२८), (१४) श्रय(यः)। (श्लोक-४३३), (१५) दर्पात्तमाह्व[य]त्। (श्लोक-४३४), (१६) सू(शू?)रो। (श्लोक-४५५), (१७) सा(शा)कम्भरी। (श्लोक-४८१), (१८) धर(रि)त्री[८]पतिः। (श्लोक-४९५)

## व्याकरणदोषानां संशोधनम्—

(१) तात(ततोऽ)। (श्लोक-१५३), (२) तं(तां)[९]। (श्लोक-१७३), (३) षष्ठिमृच्(क्)[१०]सहस्राण्यथर्वणि। (श्लोक-२४३)

## अर्थदृष्ट्या सम्भाव्यमानं संशोधनम्—

(१) वेदा(वैता)ढ्य। (श्लोक-३)

---

१ हस्तप्रतौ सर्वत्र त्रिषष्ठि इत्येव लिखितमस्ति किन्तु अस्य परिवर्तनं 'त्रिषष्ठि(ष्टि)' अनेन प्रकारेण वक्राकारे कोष्टके प्रथमे श्लोके एव दर्शितम्। अग्रेऽपि एतत् परिवर्तनं कृतं किन्तु कोष्टके तन्न न्यस्तम्।

२ बन्ध+क्त्वा।

३ लभ्+क्त्वा।

४ वृतिः(वृ+क्तिन्)=छांटना, चुनना। छिपाना, ढकना, गुप्त रखना। याचना करना, निवेदन करना। अनुरोध, प्रार्थना। घेरना, लपेटना। झाडबंदी, बाड़, बाड़ा। वृत्तिः तृतीया एकवचनम्।

५ अवधीत्(हन् धातुः द्वितीयगणः लुङ्लकार प्र.पु.एकवचनम्)।

६ भुज्+क्त(भूतकालिक कृदन्त) तस्य नः।

७ =सम्+उत्+धृ+तुमुन्।

८ =धृ+इत्र+ङीप्।

९ **'रेणुकीम्'** इत्यनेन सह अन्वयत्वात् **'ताम्'** इत्यपेक्षते।

१० चोः कुः।(पाणि.अष्टा. ८.२.३०)

**परिशिष्टानि—**

१. प्रथमे परिशिष्टे ग्रन्थ उपलब्धानां विशेषनाम्नां कोशो विद्यते।

२. द्वितीय परिशिष्टे ग्रन्थ उपलब्धमुख्यविषयाणां सारणिः कृता।

३. तृतीये परिशिष्टे सङ्केतसूचिर्विद्यते।

४. चतुर्थे परिशिष्टे सम्पादकीये निर्दिष्टानि हस्तलिखितपत्राणि सन्ति।

५. पञ्चमे परिशिष्टे सन्दर्भग्रन्थानां सूचिर्विद्यते।

**कृतज्ञताभिव्यक्तिः—**

ग्रन्थस्यास्य हस्तलिखितं(मृदुप्रतिः-soft copy) भाण्डारकरप्राच्यविद्यासंशोधनकेन्द्राल्लब्धम्। सुर्वे उपाह्वः तुषारो ग्रन्थस्यास्य लिप्यन्तरं कृतवान्। परिशिष्टनिर्माणे खेडकर उपाख्येन गणेशेन साहाय्यं कृतम्। संशोधितपाठस्य परीक्षणं संरचना च गुरुदेवैः वैराग्यरतिविजयगणिवर्यैः कृता। वस्तुत त एव मयैनं ग्रन्थं समपादयन्। मयाल्पमतिना तु कार्येऽस्मिन् किञ्चिदेव साहाय्यं कृतमिति तान् प्रति विशेषतः कृतज्ञताम् आवहामि। सुनन्दाख्यां मातरम्, भगवानाख्यं पितरम्, यत्प्रेरितोऽहं संस्कृतविषये स्नातकपदवीं प्राप्तुमुत्सहितः ताम् अहमदनगरस्थपेमराज-सारडा-महाविद्यालयस्य भूतपूर्वसंस्कृताध्यापिकां डा. अरुन्धति-जोशीं श्रद्धयावनतोऽस्मि। प्रत्यक्षाप्रत्यक्षरूपेण च येषां साहाय्येन कार्यमिदं सफलं सञ्जातं तेषां सर्वेषां कृतज्ञतामावहामि। ग्रन्थेऽस्मिन् दृश्यमानाः क्षतयो विद्वांसः सम्माक्ष्यन्तीति प्रार्थयन् विरमति।

**कृष्णा भगवान माळी**

सहसम्पादकः

श्रुतभवन-संशोधन-केन्द्रम्।

पुणे

मई २०१७

# प्रास्ताविकम्

## भारतीयपुराणसाहित्यम्—

प्राचीनभारतीयसाहित्यपरम्परायां पुराणसाहित्यस्य योगदानमतीव श्रेष्ठं विद्यते। भारतीयसाहित्ये वैदिक-जैन-बौद्धसाहित्यानि अन्तर्भवन्ति। तेषु वैदिकजैनसाहित्ययोः पुराणसङ्कल्पना विद्यते। बौद्धसाहित्ये सा नास्ति।[१] जैनसाहित्ये दिगम्बरपरम्परायां पुराणानि विद्यन्ते श्वेताम्बरपरम्परायां पुराणानि न सन्ति। दिगम्बरपरम्परायां पुराणानां निगदितैर्लक्षणैरुपेता नैके चरित्रग्रन्थाः श्वेताम्बरसाहित्यमलङ्कुर्वन्ति। यथा— आचार्यश्रीहेमचन्द्रलिखितं त्रिषष्टिशलाकापुरुषचरितम् (इ.स. ११६०-११७२)। अतः श्वेताम्बरजैनसाहित्ये पुराणानामभावो विद्यत इति वक्तुं न शक्यते, अपि तु तादृशं साहित्यं श्वेताम्बरपरम्परायां पुराण इति सञ्ज्ञया नाभिधीयते।

## पुराणशब्दस्य व्युत्पत्तिः—

(१) 'पुरा भवं पुराणम्' इति व्युत्पत्त्या अतीते काले जाता घटना पुराणशब्देनोच्यते। अत्र पुरा इति अव्ययम्— **पुरति अग्रे गच्छति इति पुरा।** तुदादिगणपठितस्य अग्र-गमनार्थकस्य पुर्[२] धातोरौणादिकेन कप्रत्यययोगेन निष्पन्नम्।

(२) अमरकोशे च पुराशब्दः प्रबन्धः, अतीतकालः तथा सङ्कटम् इति अर्थत्रये वर्णितः।[३]

(३) पुरा अव्ययाद् भवनार्थे ट्युप्रत्ययेन[४] पुराणशब्दो निष्पद्यते। अनया व्युत्पत्त्या यदत्यन्तप्राचीनकालेऽभवत् तत्पुराणम् इत्यभिधीयत इति ज्ञायते।

(४) निरुक्तकारो यास्कस्तु 'पुराणं कस्मात्? पुरा नवं भवति' इत्याह। अयमर्थः— प्राचीनकाले यन्नवीनमासीत् तत्पुराणमित्युच्यते।

---

१ जैन पुराणों का सांस्कृतिक अध्ययन— डॉ. देवीप्रसाद मिश्र, प्राक्कथनम्(पत्राङ्कः एकादशः)।

२ पुर अग्रगमने। धातुक्रमाङ्कः १३४६। धातुरूप.।

३ स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा।[अमर. ३.३.२५३]

४ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।(पाणि.अष्टा.४.३.२३)

(५) पुरापूर्वकस्यादादिगणपठितस्य अनिति[१]धातोरच्प्रत्यये विहिते पुराणशब्दो निष्पद्यते। पुरा = पुरातनम् अनिति = जीवयति इति पुराणं[२] ग्रन्थविशेषः।

(६) पुरा-अतीतान् अर्थान् अणति-कथयति इति व्युत्पत्त्या शब्दार्थकस्य अणतिधातोः पचादित्वात् अच्प्रत्यये विहिते पुराणशब्दो निष्पद्यते। प्राचीनघटनानां प्रतिपादको ग्रन्थ इति च तदर्थः।

अस्यैवार्थस्य प्रतिपादकानि वचनानि पुराणेषूपलभ्यन्ते। तद्यथा—

**यस्मात्पुरा ह्यभूच्चैतत्पुराणं तेन तत्स्मृतम्। (ब्रह्मपु. -१.१.१७३)**

**पुरा परम्परां व्यक्ति पुराणं तेन वै स्मृतम्। (पद्मपु. -१.२.५४)**

**यस्मात्पुरा ह्यनतीदं पुराणं तेन कथ्यते।**

**निरुक्तिमस्य यो वेद सर्वपापैः प्रमुच्यते॥ (वायुपुराणम्-१.२.३)**

**पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः। (मत्स्यपुराणम्-५३.७२)**

तदेवं व्युत्पत्त्या पुराणशब्देन प्राचीनघटनानां प्रतिपादकाः सर्वेऽपि ग्रन्थाः समुच्चीयन्ते तथापि परम्परया पुराणशब्देन महर्षिव्यासविरचितानामष्टादशग्रन्थ विशेषानाम् एवोपादानं भवति। व्युत्पत्तिलभ्यार्थानुसारेण सर्वे विद्वांसः पुराणं नाम प्राचीनग्रन्थविशेषमिति मतैक्येन मन्यन्ते।

## पुराणेतिहासयोः तुलना—

‘इति ह आस’, ‘इत्थं निश्चयेन बभूव’ इति चेतिहासशब्दस्य व्युत्पत्तिम् आचक्षते विद्वांसः। उक्तं च—

**धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।**
**पूर्ववृत्तं कथायुक्तमितिहासं प्रचक्षते॥**[३]

---

१ अन प्राणने। अदादि। धातुक्रमाङ्कः १०७० धातुरूप.।

२ यद्यपि अच्प्रत्ययान्तः पुराणशब्दः पुल्लिङ्गे अपेक्षते तथापि ‘पुराणं पञ्चलक्षणम्’ (मत्स्यपु. ५३.६४) ‘पुराणं ग्रन्थभेदे च क्लीवे त्रिषु पुरातने’(नानार्थरत्नमालायाम्) इत्यत्र नपुंसकलिंगे पुराणशब्दः प्रयुक्तः। अतः व्यवहारे पुराणशब्दो नपुंसकलिङ्गे प्रचलितोऽस्ति।

३ पत्राङ्कः १७४। संस्कृतहिन्दीकोशः। के.वा.आपटे। चौखम्बा-संस्कृत-भवनम्। पुनर्मुद्रणम् २०१२।

इतिहासश्च पुराणसमानविषयकोऽपि पुराणाद्भिन्न एव इति प्रतिभाति। यतो हि इतिहासे पुराणस्य वंशः तदनुचरितं चेति द्वे एवाङ्गे विषयः। पुराणस्य तु सर्गः प्रतिसर्गो वंशो मन्वतरं वंशानुचरितं चेति पञ्च लक्षणानि। यदाह राजशेखरः काव्यमीमांसायाम्[१]— **तत्र वेदाख्यानोपनिबन्धनप्रायं पुराणमष्टादशधा** इति। अनेन ज्ञायते यत् पुराणे बहुधा वैदिकाख्यानानां निबन्धनं भवति। इतिहासे तु तद्भिन्नानामित्यनयोर्भेदः। केचित्तु इतिहासं पुराणस्यैकदेशं कथयन्ति। तदुक्तं तत्रैव[२]— **पुराणप्रविभेद एवेतिहास इत्येके।** अत्र एके इत्यनेन अस्वरसः सूचितः। इतिहासस्य द्वौ भेदौ परक्रिया पुराकल्पश्च। तल्लक्षणं च—

**परिक्रिया पुराकल्प इतिहासगतिर्द्विधा।**
**स्यादेकनायका पूर्वा द्वितीया बहुनायका॥**
**तत्र रामायणं भारतं चोदाहरणे।**[३]

प्राचीनकाले पुराणेतिहासयोर्भेदः स्पष्टो नासीद्, यतो हि, महाभारतं स्वं पुराणमितिहासमपि प्रतिपादयति[४]—

**जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा। (महा.उ.प.१३६.१८)**
**द्वैपायनेन यत्प्रोक्तं पुराणं परमर्षिणा।**
**सुरैर्ब्रह्मादिभिश्चैव श्रुत्वा यदभिपूजितम्॥(महा.आ.प.१.१७)**

अमरकोशे 'इतिहासः पुरावृत्तम्'(१.६.४) इतीतिहासलक्षणम्, महाभारतस्य टीकाकारेण नीलकण्ठेन तु 'पुराणं पुरावृत्तम्'(महा.१.५.१ नी.टी.) इति तदेव लक्षणं पुराणलक्षणत्वेन स्वीकृतम्।[५]

श्रीमद्भागवते पुराणेतिहासौ पञ्चमवेदत्वेन स्वीकृतौ। इत्येतत्तयोर्महत्त्वमावेदयति।

**इतिहासपुराणानि पञ्चमं वेदमीश्वरम्।**
**सर्वेभ्य एव वक्त्रेभ्यः विसृजे सर्वदर्शनः॥**[६]

---

१ द्वितीयोध्यायः। पत्राङ्कः ६।

२ काव्यमी. द्वितीयोध्यायः। पत्राङ्कः ७।

३ काव्यमी. द्वितीयोध्यायः। पत्राङ्कः ७।

४ पत्राङ्कः-११। सं. वाङ्म. का बृ. इति.(खण्डः १३)।

५ पत्राङ्कः-१२। सं. वाङ्म. का बृ. इति.(खण्डः १३)।

६ भागवत.— ३.१२.३९।

आधुनिकास्तु घटनानां निश्चितः कालक्रम एव इतिहास इति कथयन्ति। तेन च ऐतिह्यवर्तमानकालयोः सम्बन्धो ज्ञायते। पुराणलक्षणं तु तद्व्यापकमिति स्पष्टम्।

## वैदिकपरम्परानुसारेण पुराणलक्षणम्—

अमरकोशानुसारेण पुराणं पञ्चलक्षणं भवति। उक्तमपि— **'पुराणं पञ्चलक्षणम्'(१.६.५)** इति। तानि चेमानि—

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**

**वंशानुचरितं चेति पुराणं पञ्चलक्षणम्॥(वायुपु. ४.१०)**

तत्र सर्गो नाम सृष्टिः, प्रतिसर्गो नाम लयः पुनः सृष्टिश्च, वंशो नाम देवानाम् ऋषीनां वा वंशावलिः, वंशानुचरितं नाम राज्ञां वंशावलिः। एते पञ्च विषयाः प्राधान्येन पुराणे वर्णिताः सन्ति। वाराहविष्णुपुराणादिष्वपि पुराणलक्षणमेतदेवास्ति।[१]

## वैदिकपुराणसाहित्यम्—

वैदिकसाहित्येऽष्टादश पुराणानि सन्ति। तान्येव महापुराणानीत्यप्युच्यन्ते। महापुराणानां नामानि यथा— १. मत्स्यपुराणम्, २. मार्कण्डेयपुराणम्, ३. भागवतपुराणम्, ४. भविष्यपुराणम्, ५. ब्रह्माण्डपुराणम्, ६. ब्रह्मवैवर्तपुराणम्, ७. ब्राह्मपुराणम्, ८. वामनपुराणम्, ९.वराहपुराणम्, १० विष्णुपुराणम्, ११. वायुपुराणम्, १२. अग्निपुराणम्, १३. नारदपुराणम्, १४. पद्मपुराणम्, १५. लिङ्गपुराणम्, १६. गरुडपुराणम्, १७. कूर्मपुराणं तथा च १८. स्कन्दपुराणम्।

अष्टादशोपपुराणानि सन्ति। तन्नामानि यथा— १. सनत्कुमारपुराणम्, २. नरसिंहपुराणम्, ३. स्कन्दपुराणम्. ४. शिवधर्मपुराणम्, ५. आश्चर्यपुराणम्, ६. नारदपुराणम्, ७. कपिलपुराणम्, ८. वामनपुराणम्, ९. उशनसपुराणम्, १०. ब्रह्माण्डपुराणम्, ११. वरुणपुराणम्, १२. कालिकापुराणम्, १३. महेश्वरपुराणम्, १४. साम्बपुराणम्, १५. सौरपुराणम्, १६. पराशरपुराणम्, १७. मारीचपुराणम् एवं च १८. भार्गवपुराणम्।

एतानि विहाय इतराण्यप्यन्यानि नैकानि पुराणानि सन्ति।

---

१ सर्गश्च प्रतिसर्गश्च वंशमन्वतराणि च। सर्वेष्वेतेषु कथ्यन्ते वंशानुचरितं च तत्॥(विष्णुपु.३.६.२५)

## जैनसाहित्ये पुराणसाहित्यस्य स्थानम्—

जैनसाहित्यं द्विधा विभज्यते श्वेताम्बरसाहित्यं दिगम्बरसाहित्यं च। श्वेताम्बरसाहित्ये पुराणसङ्कल्पना नास्ति। तत्र द्रव्यगणितधर्मकथाचरणरूपेषु चतुर्ष्वनुयोगेषु धर्मकथानुयोग एव पुराणविषयो व्यावर्ण्यते।

दिगम्बरसम्प्रदाये दृष्टिवादस्य पञ्चाधिकारास्सन्ति— परिकर्मसूत्रं प्रथमानुयोगः पूर्वगतं चूलिका च। तत्र प्रथमानुयोगे पुराणोपदेशो विद्यते।[१]

## जैनपरम्परायां पुराणलक्षणम्—

आचार्यजिनसेनैरादिपुराणे पुराणस्य परिभाषेत्थं प्रतिपादिता—

**लोको देशः पुरं राज्यं तीर्थं दानतपोऽन्वयम्।**
**पुराणेष्वष्टधाख्येयं गतयः फलमित्यपि॥(आदिपु. ४.३)**

अनया परिभाषया पुराणस्याष्टौ वर्ण्यविषयाः सन्ति— १. लोकः, २. देशः, ३. पुरम्, ४. राज्यम्, ५. तीर्थम्, ६.दानं तपञ्च, ७. गतिः, ८. फलं चेति। तत्र प्रथमं लोकाख्यानं नाम यत्र उद्दिष्टस्य लोकस्य व्युत्पत्तिः, तस्य दिग् दिगन्तरालस्य च व्यासदैर्घ्ये इत्यादीनां वर्णनम्[२]। लोकैकभागो देशः, तत्र वर्तमानानां देश-पर्वत-द्वीप-समुद्रादीनां वर्णनं देशाख्यानम्[३]। राजधानीवर्णनं पुराख्यानम्[४]। राज्यविस्तारस्य वर्णनं राजाख्यानम्[५]। अपारसंसारात्तारयतीति तीर्थं तस्य तीर्थङ्कराणां च वर्णनं तीर्थाख्यानम्[६]। दानतपसोर्महत्त्वापादकं कथावर्णनं दानतपआख्यानम्[७]। गतिवर्णनं

---

१ पूर्णार्घ्यः(पत्राङ्कः २४१)।

२ लोकोद्देशनिरुक्त्यादिवर्णनं यत् सविस्तरम्।
लोकाख्यानं तदाम्नातं विशोधितदिगन्तरम्॥४.४॥(आदिपु.)

३ तदेकदेशदेशाद्रद्वीपाब्ध्यादिप्रपञ्चनम्।
देशाख्यानं तु तज्ज्ञेयं तज्ज्ञैः सञ्ज्ञानलोचनैः॥४.५॥(आदिपु.)

४ भरतादिषु वर्षेषु राजधानीप्ररूपणम्। पुराख्यानमितीष्टं तत् पुरातनविदां मते॥४.६॥(आदिपु.)

५ अमुष्मिन्नधिदेशोऽयं नगरं चेति तत्पतेः।
आख्यानं यत्तदाख्यातं राज्याख्यानं जिनागमे॥४.७॥(आदिपु.)

६ संसाराब्धेरपारस्य तरणे तीर्थमिष्यते। चेष्टितं जिननाथानां तस्योक्तिस्तीर्थसङ्कथा॥४.८॥(आदिपु.)

७ यादृशं स्यात्तपोदानमनीदृशगुणोदयम्। कथनं तादृशस्यास्य तपोदानकथोच्यते॥४.९॥(आदिपु.)

गत्याख्यानम्[१] तथा मोक्षप्राप्तिपर्यन्तं पुण्यपापफलानां वर्णनं फलाख्यानम्[२] इति।

शलाकापुरुषाणां जीवनचरितमेव जैनपुराणानां केन्द्रवर्ती विषयः। आचार्यश्रीहेमचंद्रसूरिकृतस्य 'अभिधानचिन्तामणेः' व्युत्पत्तिरत्नाकरस्य टीकाकर्ता उपाध्यायश्रीदेवसागरगणिः शलाकापुरुषस्य पुरुषेषु जातरेख इत्यर्थमाह।[३] कथावलीकार आचार्यश्रीभद्रेश्वरसूरिः शलाकापुरुषस्य सम्यक्त्वरूपशलाकया युक्त इत्यर्थमाह।[४] जैनपारिभाषिकशब्दकोशे 'शलाकापुरुषः' नाम 'सर्वोत्तमपुरुषः' कथितः।[५]

आगमे तु सामान्यतः शलाकापुरुषाणां कृते उत्तमपुरुषाः(उत्तमपुरिसा) इत्येव प्रयोग उपलभ्यते तत्र शलाकापुरुष इति शब्दप्रयोगो न दृश्यते। समवायांगसूत्रे चतुर्विंशतिः तीर्थंकराः, द्वादश चक्रिणः, नव बलभद्राः, नव वासुदेवा इति चतुःपञ्चाशत्पुरुषा उत्तमपुरुषाः कथिताः।[६] अनन्तरम् एतेषाम् एवोत्तमपुरुषाणां कृते शलाकापुरुषा इति सञ्ज्ञा रूढा जातेति सम्भाव्यते। आचार्यश्रीहेमचन्द्रसूरिभिः[७] जिनसेनाचार्यैः च त्रिषष्टिः शलाकापुरुषा उक्ताः। उपर्युक्तैः चतुःपञ्चाशद्भिरुत्तमपुरुषैः सहिता नव प्रतिवासुदेवाः त्रिषष्टिः शलाकापुरुषा भवन्ति। आचार्यश्रीभद्रेश्वरसूरिभिः कथावली(कहावली)ग्रन्थे उपर्युक्तत्रिषष्टिशलाकापुरुषसहिता नव नारदा इति द्वासप्ततिः शलाकापुरुषा वर्णिताः।[८] प्रस्तुतकृतौ तु त्रिषष्टिः शलाकापुरुषाः सन्ति।

---

१ नरकादिप्रभेदेन चतस्रो गतयो मताः। तासां सङ्कीर्तनं यद्धि गत्याख्यानं तदिष्यते॥४.१०॥(आदिपु.)

२ पुण्यपापफलावाप्तिजन्तूनां यादृशी भवेत्।
तदाख्यानं फलाख्यानं तच्च निःश्रेयसावधिः॥४.११॥(आदिपु.)

३ त्रिषष्टिः शलाकाभूताः शलाकापुरुषाः, पुरुषेषु जातरेखा इत्यर्थः। (अभि. चिन्ता. व्युत्प.रत्ना.टी. श्लोक-७००)

४ न य सम्मत्तसलायारहिया नियमेणिमे जओ तेण। होंति सलाया पुरिसा...॥ (कहावली, संदर्भ- चउपन्नमहापुरिसचरियं प्रस्तावना- अमृतलाल मोहनलाल भोजक, पत्र-४१)

५ शलाकापुरुष सामान्य माणसोमां सर्वोत्तमपुरुषो, २४ तीर्थंकर भगवंतो १२ चक्रवर्तीओ.... जै.पारि.श.कोश(पत्र १२९)

६ भरहेरवएसु णं वासेसु एगमेगाए ओसप्पिणीए एगमेकाए उस्सप्पिणीए चउप्पन्नं चउप्पन्नं उत्तमपुरिसा उप्पज्जिसु वा उप्पज्जंति वा उप्पज्जिस्संति वा,
तं जहा— चउवीसं तित्थकरा बारस चक्कवट्टी नव बलदेवा नव वासुदेवा।(समवायांग. ५४)

७ जिनैः सह त्रिषष्टिः स्युः शलाकापुरुषा अमी...(अभि.चिन्ता. श्लोक-७००)

८ चउवीस जिणा बारस चक्की णव पडिहरी णव सरामा। हरिणो चक्कि-हरीसु य केसु य णव नारया होंति॥

अस्यामवसर्पिण्यां शान्तिनाथ-कुन्थुनाथ-अरनाथाः तीर्थङ्करत्वं चक्रित्वं चेति पदद्वयं दधिर इति व्यक्तिशः शलाकापुरुषाः षष्टिरेव सन्ति।

**जैनपुराणानां वर्ण्यविषयः—**

जैनपुराणानां वर्ण्यविषयस्तु शलाकापुरुषाणां पूर्वोत्तरभववर्णनसहितं जीवनचरित्रं विद्यते। ते शलाकापुरुषाः त्रिषष्टिसङ्ख्यकाः सन्ति— चतुर्विंशतिः तीर्थङ्कराः, द्वादश चक्रवर्तिनः, नव बलभद्राः, नव नारायणाः(वासुदेवाः), नव प्रतिनारायणाः(प्रतिवासुदेवाः) चेति। एकस्मिन् पुराणे एकस्याधिकस्य वा शलाकापुरुषस्य जीवनवृत्तमुपलभ्यते। यथा— महापुराणे त्रिषष्टिशलाकापुरुषाणां जीवनवृत्तं गदितमस्ति। पद्मपुराणे तु रामलक्ष्मणरावणानां चरितं समुपलभ्यते। हरिवंशपुराणे कृष्ण-बलराम-जरासन्धा वर्णिताः। वीरवर्धमानचरिते तीर्थङ्करमहावीरस्य वर्णनं विद्यते। पाण्डवपुराणे कुरुवंशस्येतिवृत्तं वर्णितम्।

**जैनपुराणसाहित्यम्—**

जैनपुराणेषु वैदिकपरम्परायाम् इव पुराणोपपुराणेत्यादिर्विभागो न दृश्यते। जैनसाहित्ये संस्कृत-प्राकृत-अपभ्रंश-कन्नडादिभाषाबद्धानि पञ्चाशदधिकानि पुराणानि सन्ति। पद्मपुराणम्, हरिवंशपुराणम्, महापुराणम्, उत्तरपुराणमित्येतानि संस्कृतभाषानिबद्धानि प्रमुखाणि जैनपुराणानि सन्ति। तिलोयपण्णत्ति, पउमचरिउ, चउपन्नमहापुरिस-चरित्त, कहावली इति प्रामुख्येन प्राकृतपुराणानि सन्ति। स्वयम्भूरचितं पउमचरिउ, हरिवंशपुराणं रिट्ठणेमिचरिउ वा, धवलरचितं हरिवंशपुराणम्, यशःकीर्तिरचितं हरिवंशपुराणम्, पुष्पदन्तविरचितं तिसट्ठिमहापुरिसगुणालंकारं चेत्येतान्यपभ्रंशभाषायाम् उपलभ्यमानानि जैनपुराणानि वर्तन्ते।

अत्र कानिचिदेव पुराणानि उक्तानि सन्ति। अन्यान्यपि पुराणानि तेषां रचनाकालः कर्तारश्च इत्येतेषां निदर्शकं कोष्टकं 'संस्कृत वाङ्मय का बृहद् इतिहास' (द्वादशः खण्डः) नाम्ना पुस्तकादत्र(प्रस्तावनानन्तरम्) उद्धृतम्।

---

उड्ढगई चिय जिण-राम-णारया जंतऽहोगइं चेय।
सणियाणा चिय पडिहरि-हरिणो दुहओ वि चक्कि त्ति॥
न य सम्मत्तसलायारहिया नियमेणिमे जओ तेण। होंति सलाया पुरिसा बहत्तरी...॥
(कहावली, संदर्भः- चउपन्नमहापुरिसचरियं प्रस्तावना- अमृतलाल मोहनलाल भोजक, पत्रम्-४१)

अन्यपुराणानामपेक्षया जैनपुराणसाहित्य इतिवृत्तस्य यथार्थता सुरक्षिता दृश्यते। अत एवोच्यते यत् प्राचीनभारतीयेतिहासज्ञानाय जैनपुराणकथाग्रन्थानामती वोपयुज्यता विद्यते।[१]

**त्रिषष्टिस्मृतिः—**

स्मृ धातोः क्तिन् प्रत्यये कृते 'स्मृतिः' शब्दो निष्पद्यते। पण्डिताशाधरेण प्रत्यास्मरणार्थे[२] स्मृतिशब्दस्योपयोगः कृतः। अस्मिन् ग्रन्थे महापुराणाधारेण सङ्क्षेपेण त्रिषष्टिशलाकापुरुषचरितं गदितम्। महापुराणं खण्डद्वये विभक्तम्— प्रथमम् आदिपुराणं पूर्वपुराणं वा। द्वितीयं तु उत्तरपुराणमिति। आदिपुराणं सप्तचत्वारिंशत् पर्वैर्युक्तं तेष्वाद्यानि द्वाचत्वारिंशत्पर्वाणि त्रिचत्वारिंशत्तमस्य पर्वण आद्यं श्लोकत्रयं च भगवज्जिनसेनाचार्यैर्निरमायि। अवशिष्टानि पञ्च पर्वाणि उत्तरपुराणञ्च श्रीजिनसेनाचार्याणां प्रमुखशिष्यैः श्रीगुणभद्राचार्यैर्व्यरचि।

**ग्रन्थरचनाप्रयोजनम्—**

आशाधरादवाप्तविद्येन **जाजाक**नाम्ना पण्डितेन नित्यस्वाध्यायार्थमतिविस् तृतानां पुराणानां सङ्क्षेपार्थं प्रार्थित आशाधरः त्रिषष्टिस्मृतिं रचयामासेति प्रशस्तौ स आह।[३] त्रिषष्टिशलाकापुरुषाणां प्रतिदिनं स्मरणार्थं लघुपरिमाणोऽयं ग्रन्थो विद्यते। ग्रन्थेऽस्मिन् तेषां सर्वेषां श्रेष्ठपुरुषाणां सङ्क्षिप्तं वर्णनं विद्यते। ग्रन्थपठनेन तेषां सर्वेषां स्मरणं भवति अतः 'त्रिषष्टिस्मृतिः' इति ग्रन्थनाम सार्थकमस्ति। अस्योपरि पञ्जिकाटीकापि तेनैव निर्मिमे।[४]

**ग्रन्थरचनासमयः स्थलञ्च—**

परमारवंशीयराज्ञो देवपालस्य पुत्रो जैतुगिदेवो यदा अवन्तीपतिरासीत्तदा

---

१ पत्राङ्कः-१२। सं. वाङ्ग. का बृ. इति.(खण्डः १३)।

२ त्रिषष्टिशलाकापुरुषाणां स्मरणं ग्रन्थकर्तुरभिप्रेतम्।

३ सङ्क्षिप्यतां पुराणानि नित्यस्वाध्यायसिद्धये।
इति पण्डितजाजाकाद्विज्ञप्तिः प्रेरिकात्र मे॥९॥(त्रि.स्मृ.प्रश.)

४ पञ्जिकाटीकायुतायाः त्रिषष्टिस्मृतेरेकैव हस्तप्रतिः इडादुर्गस्थदिगम्बरीयग्रन्थागारे वर्तते इति जिनरत्नकोशाद् ज्ञायते।

नलकच्छे नगरे नेमनाथ-चैत्ये १२९२ विक्रमे संवत्सरे ग्रन्थस्यास्य रचना सम्पन्ना।[१]

**ग्रन्थस्यादर्शाप्रतिः—**

ग्रन्थस्यास्य आदर्शप्रतिः **खण्डेलवाल(स्कन्दपाल?)वंशीयेन महणकमलश्री**पुत्रेण **धीनाकेन** लिखिता। प्रशस्तौ लेखकस्यास्योल्लेखो लभ्यते।[२]

**प्रशस्तौ अन्यग्रन्थानामुल्लेखः—**

धर्मामृतम्, भरतेश्वराभ्युदयमहाकाव्यं च इत्यनयोर्द्वयोः ग्रन्थयोरुल्लेखो प्रशस्तौ अव्याप्यते।[३]

**त्रिषष्टिस्मृतिः-ग्रन्थस्वरूपम्—**

ग्रन्थस्यास्यारम्भो भगवतो महावीरस्य इन्द्रभूतेर्गणधरस्य त्रिषष्टिशलाकापुरुषाणां च नमस्कारेण सङ्क्षेपेण महापुराणकथनस्य प्रतिज्ञया च भवति। ग्रन्थेऽस्मिन् प्रति तीर्थङ्करमेकम् इति चतुर्विंशतिविभागाः सन्ति। अत्र आद्यन्तयोः तीर्थङ्करयोर्विस्तृतं वर्णनं विद्यते। विंशतितमे प्रकरणे महाभारतं द्वाविंशतितमे प्रकरणे रामायणं च सङ्क्षेपेण वर्णितम्। अन्यत्र सामान्यतः तीर्थङ्कराणां विरक्तेः कारणं तेषां प्राक्तनयोर्द्वयोर्भवयोर्वर्णनं तच्छासनकालिकानां चक्रवर्त्यादीनां त्रिषष्टिशलाकापुरुषाणां वर्णनमेवास्ति। उच्चस्तरीया भाषा, अप्रचलितानां शब्दानां[४] च प्रयोग आशाधरस्य वैदुष्यमभिव्यनक्ति। अनुष्टुप्छन्दसि निर्मितेऽस्मिन् ग्रन्थे कुत्रचिदार्यादिवृत्तान्यपि दृश्यन्ते। आद्युत्तरपुराणयोरुपविंशति सहस्राणि श्लोकानि विद्यन्ते। केवलं पञ्चनवत्यधिकचतुश्शतेषु श्लोकेषु तत्सारो ग्रन्थेऽस्मिन्नुपनिबद्ध इति महदस्य पाण्डित्यम्।

---

१ प्रमारवंशवार्धीन्दुदेवपालनृपात्मजे।
श्रीमज्जैतुगिदेवेऽसिस्थाम्नावन्तीमवत्यलम्॥१२॥ (त्रि.स्मृ.प्रश.)
नलकच्छपुरे श्रीमन्नेमिचैत्यालयेऽसिधत्।
ग्रन्थोऽयं द्वि-नव-द्व्येकविक्रमार्कसमात्यये॥१३॥(त्रि.स्मृ.प्रश.)

२ खण्डिल्यवंशे महणकमलश्रीसुतः सदृक्।
धीनाको वर्धतां येन लिखितास्याद्यपुस्तिका॥१४॥(त्रि.स्मृ.प्रश.)

३ धर्मामृतादिशास्त्राणि कुशाग्रीयधियामिव।
यः सिद्ध्यङ्कं महाकाव्यं रसिकानां मुदेऽसृजत्॥६॥(त्रि.स्मृ.प्रश.)

४ त्रिषष्टिः, वाच्य, श्रित्य, स्वीकार्य, प्रापय्य, प्रशमय्यादीनाम्।

**कर्तृपरिचयः—**

शाकम्भरीदेशीय सपादलक्ष[१]नगर्यन्तर्गतमाण्डलदुर्गे(मांडलगढ/मंडलगढ) निवसति स्म। स व्याघ्रेरवाल(बघेरवाल)वंशीयो जैनधर्मानुयायी श्रावक आसीत्। तस्य पिता सल्लक्षणाभिधानो माण्डलदुर्गस्य दुर्गपतिरासीत्।[२] मातुर्नाम रत्नी आसीत्। ईसवीये त्रिनवत्यधिकैकादशशततमे(११९३) वर्षे शहावुद्दिनघोरी[३] नामकेन यवनेन चाहमान(चौहान)वंशीयं पृथ्वीराजं हत्वा देहली स्वाधीना कृता। तदनु अजयमेरु(अजमेर)दुर्ग आक्रान्त उद्ध्वस्तश्च। अनेनाक्रमणेन त्रस्तः सल्लक्षणः स्वीयेन परिवारेण अन्यैश्च जनैः सह निजां जन्मभूमिं त्यक्त्वा धारानगर्यां परमारनरेशानाश्रित्य उवास। तत्रापि धाराधीशानां कृपाभाजनो भूत्वा राज्यसेवासु उन्नतिमवाप्य अर्जुनवर्मणो राज्ञः समये (वैक्रमीये १२६७-१२७५, ईसवीये १२१०-१२१८) मालव[४]राज्यस्य सान्धिविग्रहिको मन्त्री(परराष्ट्रसचिवः) बभूव।[५]

---

१ चौहानकाले(ईसवीय एकादशशताब्दीतः त्रयोदशशताब्दी) जयपुरप्रान्ते(district)(जयपुरनगरात् पञ्चचत्वारिंशत् किलोमीटर दूरे) सपादलक्षनाम्नी नगरी आसीद्। साधुना नागौरनाम्ना प्रसिद्धास्ति।

२ श्रीमानस्ति सपादलक्षविषयः सा(शा)कम्भरीभूषण-
स्तत्र श्रीरतिधाममण्डलकरं नामास्ति दुर्गं महत्।
श्रीरत्न्यामुदपादि तत्र विमलव्याघ्रेरव्यालान्वया-
च्छ्रीसल्लक्षणतो जिनेन्द्रसमयश्रद्धालुराशाधरः॥१॥(त्रि.स्मृ.प्रश.)

३ घोरीवंशीय शहावुद्दिनः(साहब-उद्-दिन मुहम्मद घोरी) द्वादशे त्रयोदशे च शतके(११६२-१५/०३/१२०६) वर्तमानस्य अफगानिस्थान-पाकिस्थान-भारतस्योत्तरस्य प्रदेशस्य शासक आसीत्। तेन ईसवीये ११७५तमे वर्षे मुलतानप्रदेशो म्लेच्छशासकाज्जितः। ईसवीये ११७९तमे वर्षे गुर्जरात्रप्रदेशस्य चौलुक्यवंशीयस्य राज्ञो बालभीमदेवस्य(११७८-१२४१) मात्रा नायकीदेव्या युधि पराजितः।

४ साम्प्रतस्य मध्यप्रदेशस्य पश्चिम-दक्षिण-राजस्थानस्य च कञ्चित्प्रान्तं(district) व्याप्य स्थितः प्रदेशः। स विन्ध्यस्योत्तरस्थितस्य निमारप्रान्तस्यापि कञ्चित् प्रदेशं व्याप्नोति। प्राचीनकाले मालवप्रान्तो स्वतन्त्र आसीत्। तत्र अवन्ती-मौर्य-गुप्त-परमार-मालवसुलतान-मुघल-मराठादयः अशासुः।

मालवो मोहोलो वा इत्यस्य प्रदेशस्य ईसवीयस्य सप्तमे शतके झुआन-झँग नाम्ना चीनी-प्रवासिना यदुल्लेखः कृतोऽस्ति स उल्लेखः स्पष्टतया इदानीन्तनीयं गुर्जरात्रप्रदेशं निर्दिशति।

राष्ट्रकूटवंशीयाः सम्राजः मालवप्रदेशे प्रशासकरूपेण परमारवंशीयान् न्ययुञ्जन्। दशमस्य शतकस्योत्तरार्धात्तत्र परमारवंशीयानां शासनमासीत्। तैस्तत्र धारा नाम्ना राजनगरी प्रस्थापिता। राजा भोजः(ईसवीय १०१०-१०६०) अस्यैव प्रदेशस्य शासक आसीत्।

५ म्लेच्छेशेन सपादलक्षविषये व्याप्ते सुवृत्तक्षति-

धारायाम् आशाधरः पण्डितमहावीरात् शिक्षामासाद्य विविधेषु विषयेषु पाण्डित्यमुपागमत्। शास्त्राध्ययनं साहित्यसाधनां च उद्दिश्य आशाधरो धारां त्यक्त्वा तन्निकटवर्तिनलकच्छपुरे(नालछा) अवसत्।[१] तत्र स्वस्थापिते विद्यापीठे वसता अनेन (वैक्रमीये १२८२-१३०२, ईसवीये १२२५-१२४५) विविधविषयाः साधिताः चत्वारिंशद् ग्रन्थाश्च निर्मिताः। तेषु चत्वारो ग्रन्थाः स्वोपज्ञटीकोपेताः सन्ति। तत्कालिका जैना अजैनाश्च विद्वांसः तं नयविश्वचक्षुः, प्रज्ञापुञ्जः, कविराजः, कविकालिदासः, सरस्वतीपुत्रः, आचार्यकल्पः, सूरिरित्यादिभिरनेकैः सार्थकैरुपाधिभिरलञ्चक्रुः। नैके गृहस्थाः त्यागिनो मुनिवराश्च आशाधरस्य विद्याशिष्या आसन्। तेषु उदयसेनो मुनिः वादीन्द्रो विशालकीर्तिश्च आशाधरान्न्यायशास्त्रमधीत्य वादविजये समर्थोऽभूत्। शासनचतुर्विंशतिकाकर्ता यतिपतिर्मदनकीर्तिः पण्डितो देवचन्द्रश्च व्याकरणमध्यगात्। भट्टारको विनयचन्द्रो धर्मशास्त्रमधिजिग्ये। तेन विज्ञप्त आशाधर इष्टोपदेशटीकां विनिर्ममे। भव्यकण्ठाभरणपञ्चिका-पुरुदेवचम्पू-मुनिसुव्रतकाव्यानां कर्ता कविरर्हदासः पण्डितो जाजाकश्च आशाधरस्य ग्रन्थेभ्यो बोधमवाप। राज्यस्य प्रधानामात्यो बिल्हणकवीशो बालसरस्वती महाकविर्मदनोपाध्यायश्चाजैनोऽपि सन् आशाधरमतीव प्रशसंस। खण्डेलवालवंशीयो महात्मा हरदेवः[२], पौरपाटान्वयः(परवार/पोरवाड) समुद्धरश्रेष्ठिपुत्रमहीचन्द्रसाहुः, खण्डेलवालवंशीयः केल्हणः, श्रावको धनचन्द्रस्तथा खण्डेलवालवंशीयमहणकमलश्रीपुत्रो धीनाक इत्यादय आशाधरस्य प्रमुखा गृहस्थभक्ता आसन्। तेषां विज्ञप्त्या आशाधरेण बहवो ग्रन्था रचिताः।

आशाधरस्य सरस्वती नाम्ना जाया छाहडनामा च पुत्र आसीत्। स स्वपितामहात् मन्त्रीश्वरसल्लक्षणात् प्रशिक्षणमवाप्य अर्जुनवर्मणो राज्ञः प्रियोऽभूत्।[३]

---

त्रासाद्विन्ध्यनरेन्द्रदोः परिमलस्फूर्जत्त्रिवर्गौजसि।
प्राप्तो मालवमण्डले बहुपरीवारः पुरीमावसन्
धारामपठज्जिनप्रमितिवाक्शास्त्रे महावीरतः॥३॥ (त्रि.स्मृ.प्रश.)

१ श्रीमदर्जुनभूपालराज्ये श्रावकसङ्कुले। जिनधर्मोदयार्थं यो नलकच्छपुरेऽवसत्॥४॥(त्रि.स्मृ.प्रश.)

२ अल्हणस्य प्रपौत्रः, पापाभिधस्य पौत्रः, पद्मसिंहस्य भ्रातृव्यः, बहुदेवस्य पुत्र उदयदेवस्तम्भदेवयोः ज्येष्ठो भ्राता आसीत्।(अल्हण-पापा-पद्मसिंहबहुदेवौ-हरदेव-उदयदेव-स्तम्भदेवाः इति वंशपरम्परा)

३ सरस्वत्यामिवात्मानं सरस्वत्यामजीजनत्।
यः पुत्रं छाहडं गुण्यं रञ्जितार्जुनभूपतिम्॥२॥ (त्रि.स्मृ.प्रश.)

अन्तिमे वयसि आशाधरो भोगेभ्यो विरज्योदासीनव्रतिश्रावकरूपेण आत्मसाधने निरतोऽभवत्।

**ग्रन्थरचना**[१]—

१) **अध्यात्मरहस्यम्**— द्वासप्ततिश्लोकप्रमाणस्यास्य ग्रन्थस्य रचना कविना पितुराज्ञया कृता। ग्रन्थस्यास्यापरं नाम 'योगोद्दीपनम्' इति।[२] अजमेरस्थह-स्तलिखितभाण्डागाराल्लब्धायाः हस्तलिखितस्याधारेण ग्रन्थस्यास्य प्रकाशनं जैनसिद्धान्तप्रकाशिनी संस्था, श्रीमहावीरतः वीरसेवामन्दिराज्जातम्। ग्रन्थेऽस्मिन् आत्मा, परमात्मा तथा उभयोः सम्बन्धस्य रहस्यमुद्घाटितमस्ति। आचार्यकुन्दकुन्दाचार्येण आत्मनः त्रैविध्यमुक्तं बहिरात्मा, अन्तरात्मा परमात्मा चेति। आशाधरेण तु स्वात्मा, शुद्धस्वात्मा तथा परब्रह्म इत्येवंप्रकारेण आत्मनो भेदाः प्रतिपादिताः। आत्मनः स्वरूपं प्राप्तिश्च कथं कर्तुं शक्यते इत्यस्यापि निरूपणं कृतम्।

२) **अनगारधर्मामृतम्**— ९५४ श्लोकपरिमितोऽयं ग्रन्थः।

३) **अनगारधर्मामृत-भव्यकुमुदचन्द्रिकाटीका**— धनचन्द्रहरिदेवयोः प्रेरणया १२,२०० श्लोकपरिमितायाः टीकायाः रचना विक्रमस्य १३०० तमे वर्षे कार्तिकशुक्ल ५ सोमवासरे पूर्णा। माणिकचन्द-ग्रन्थमालायामीसवीये १९१६ तमे वर्षे टीकैषा प्रकाशिता।

४) **अभिषेकविधिः/नित्यमहोद्यात**— प्रकाशितोऽयं ग्रन्थः श्रुतसागरसूरेः टीकोपेतः। भगवतां जिनानां महाभिषेकसम्बन्धिनः शास्त्रमेतद्विद्यते।

५) **अमरकोशटीका**— अमरसिंहस्य प्रसिद्धकोशस्योपरि एषा टीका विद्यते। साम्प्रतमनुपलब्धेयं टीका विद्वद्भिरन्वेषणीया।

६) **अष्टाङ्गहृद्द्योतिनी टीका**— न प्राप्यते।

७) **आराधनासारटीका**— देवसेनस्य प्राकृत-आराधनासारस्यैषा सप्तपत्रात्मिका

---

१ श्रीदेवर्धिप्रणीतात् जैनग्रन्थकारकोशादुद्धृतोऽयं विषयः। द्वितीयः परिच्छेदः-दिगम्बरपरम्परा (पत्राङ्कः-१२) उक्तग्रन्थातिरिक्तो विषयोऽस्माभिः ससन्दर्भो न्यस्तः।

२ पण्डितप्रवर आशाधरः, पत्राङ्कः ६।

सङ्क्षिप्ता टीका विक्रमस्य १५८१ तमे वर्षे रचिता। एषापि टीका मुनिविनयचन्द्रोपरोधेन कृता आमेरस्थे भाण्डारे विद्यते।

८) **इष्टोपदेशटीका**— आचार्य देवनन्दिनाम्(पूज्यपादानां) इष्टोपदेशस्य सागरचन्द्रशिष्यस्य मुनिविनयचन्द्रस्यानुरोधेन कृता टीकेयं वीरसेवामन्दिरतो हिन्दीटीकोपेता प्रसिद्धास्ति।

९) **काव्यालङ्कारटीका**— रुद्रटस्य काव्यालङ्कारग्रन्थस्यैषा टीका विद्यते।

१०) **क्रियाकलापः**— अस्य ग्रन्थस्य ५२ पत्रात्मिका प्रति ऐ. पन्नालाल दिगम्बर जैन सरस्वती भवनम्, मुम्बई इत्यत्र वर्तते।

११) **जिनयज्ञकल्पः**— ग्रन्थोऽयं प्रसिद्धः परमस्य स्वोपज्ञा टीका 'कल्पदीपिका' अप्राप्या विद्यते। ग्रन्थेऽस्मिन् प्रतिष्ठासम्बन्धिक्रियानां विस्तृतवर्णनं विद्यते। ग्रन्थस्यास्य रचना विक्रमस्य १२८५ तमे वर्षे परमारवंशीयदेवपालराज्ञो राज्ये नलकच्छपुरे नेमिनाथचैत्यालये पापासाधोरनुरोधेन कृता।[१]

१२) **जिनयज्ञकल्पटीका**— टीका अप्राप्या विद्यते।

१३) **त्रिषष्टिस्मृतिः**— १९३७ तमे वर्षे ग्रन्थस्यास्य मराठीभाषान्तरान्वितं प्रकाशनं जातम्। अधुना पुस्तकमेतद् अनुपलब्धं विद्यते। जिनसेनगुणभद्रयोः महापुराणस्य साररूपो ग्रन्थोऽस्त्येषः।

१४) **त्रिषष्टिस्मृतिटीका-पञ्जिका[२]।**

१५) **प्रमेयरत्नाकरः**— तर्कशास्त्रविषयकोऽयं पद्यानुबद्धो ग्रन्थोऽधुनाप्राप्योऽस्ति।

१६) **बृहच्छान्तिकाभिषेकः।**

---

१ विक्रम वर्ष सपञ्चाशीति द्वादशशतेष्वतीतेषु। आश्विनसितान्त्यदिवसे साहसमल्ला पराख्यस्य।
श्रीदेवपाल नृपतेः प्रमारकुलशेखरस्य सौराज्ये, नलकच्छपुरे सिद्धो ग्रन्थोऽयं
नेमिनाथचैत्यगृहे॥२०॥ (जिनयज्ञ. प्रश.)

२ अस्योल्लेखो त्रिषष्टिस्मृतौ जिनरत्नकोशे च प्राप्यते।
सोऽहमाशाधरः कण्ठमलङ्कर्तुं सधर्मणाम्। पञ्जिकालङ्कृतं ग्रन्थमिमं पुण्यमरीरचम्॥७॥
(त्रि. स्मृ.प्रश.)

१७) **भरतेश्वराभ्युदयः**[१]— भरतचक्रवर्तिजीवनवर्णनात्मकस्य स्वोपज्ञटीकोपेतस्य काव्यस्यास्य रचना स्वकल्याणाय कृताशाधरेण।[२]

१८) **भूपालचतुर्विंशतिकाटीका**— भूपालकवेः चतुर्विंशतिस्तोत्रस्यैषा टीका सापि उपर्युक्तविनयचन्द्रमुनये कृतास्ति, एषापि मुम्बईतः प्रकाशिता विद्यते।

१९) **मूलाराधनाटीका**— शिवार्यस्य प्राकृत-भगवती-आराधनाग्रन्थस्येयं टीका वर्तते। अपराजितसूरेः टीकायुतोऽयं ग्रन्थः प्रकाशितः।

२०) **योगदीपिका।**

२१) **रत्नत्रयविधानम्**— गद्यपद्यमिश्रितोऽयं ग्रन्थः सल्लक्षणपुरनिवासिनः, परमारवंशीयराज्ञः देवपाल(साहसमल्ल)स्य राज्ये कोशविभागे नियुक्तस्य, नागदेवस्य प्रेरणया कविना रचितः, नागदेवस्य पत्न्यर्थम्।[३]

२२) **राजीमतिविप्रलम्भः**— नेमिनाथस्य वैराग्यवर्णनमस्मिन् ग्रन्थे विद्यते। स्वोपज्ञटीकायुक्तस्य खण्डकाव्यस्वरूपग्रन्थस्यास्य रचना १२९६ तमे वर्षे सम्पन्ना। परमेषोऽपि ग्रन्थोऽद्यापि अप्राप्यो विद्यते।

२३) **श्रावकाचारः।**

२४) **सहस्रनामस्तवनटीका**— टीकेयं भारतीयज्ञानपीठतः प्रसिद्धास्ति। अस्याः टीकायाः प्रतिः मुनिविनयचन्द्रेण लिखिता विद्यते। अत्र अष्टोत्तरसहस्राणि जिननामानि त्रिचत्वारिंशदधिकशतश्लोकेषु निबद्धानि। जिनसेनेन महापुराणस्य

---

१ यः सिद्ध्यङ्कं महाकाव्यं रसिकानां मुदेऽसृजत्॥६॥(त्रि. स्मृ.प्रश.)
सिद्धिशब्दोऽङ्कं सर्गे चिह्नं भरतेश्वराभ्युदयसत्काव्यम्। (तत्रैव टिप्पणौ)

२ सिद्ध्यङ्कं भरतेश्वराभ्युदयसत्काव्यं निबन्धोज्ज्वलं
यस्त्रैविद्यकवीन्द्रमोदनसहं स्वश्रेयसेऽरीरचत्।
योऽर्हद्वाक्यरसं निबन्धरुचिरं शास्त्रं च धर्मामृतं
निर्माय न्यदधान्मुमुक्षुविदुषामानन्दसान्द्रे हृदि॥११॥
(सा.धर्मा.प्रश., पण्डितप्रवर आशाधरः, पत्राङ्कः २७२।

३ विक्रमार्क द्व्यशीत्यग्रद्वादशाब्दशतात्यये। दशम्यां पश्चिमे(भागे) कृष्णे प्रयतां कथा॥८॥
पत्नी श्रीनागदेवस्य नन्द्याद्धर्मेण यायिका। तासीद्रत्नत्रयविधिचरतीनां पुरस्सरी॥९॥ (रत्नत्रय. प्रश.)

पञ्चविंशतितमे पर्वे नवनवतितमे श्लोके १००८ लक्षणोपेतत्वात् जिनपूजा १००८ नाम्ना क्रियते इति उक्तम्।[१]

२५) **सागारधर्मामृतम्**— सागारधर्मस्य वर्णनपरोऽयं ग्रन्थः पौरपाटान्वयी महीचन्दसाधुप्रेरणया विरचितः। महीचन्देन साधुनैव प्रथमं पुस्तकं लिखितमस्य ग्रन्थस्य।

२६) **सागारधर्मामृतम्-भव्यकुमुदचन्द्रिकाटीका**— ४५००श्लोकप्रमाणाया अस्याः टीकायाः रचना विक्रमस्य १२९६ तमे वर्षे पौषकृष्णपक्षे ७ सप्तमीतिथौ शुक्रवासरे पूर्णा जाता।

२७) **ज्ञानदीपिका**— सागारानगारधर्मामृतस्य स्वोपज्ञपञ्जिकाटीका विद्यते साम्प्रतमेषापि अप्राप्या।

२८) **सिद्धचक्रपूजा।**

—(जिनरत्न. ३२१/३९४/२८५/१४/४३६)

ग्रन्थकर्तुराशाधरविषये तत्कृतानां ग्रन्थानां विषये चाधिकविवरणार्थं 'पण्डितप्रवर आशाधार' 'पण्डित आशाधर व्यक्तित्व और कर्तृत्व' इति द्वे पुस्तके द्रष्टव्ये।[२]

**उपसंहार**—

भारतीयसाहित्ये पुराणसाहित्यमतीव महत्त्वं बिभर्ति। वैदिकपुराणसाहित्यमिव जैनपुराणसाहित्यमपि समृद्धं वर्तते। त्रिषष्टिशलाकापुरुषाणां तेष्वेकतमस्य वा पुरुषस्य जीवनवर्णनं पुराणानां प्रतिपाद्यो विषयो भवति। महापुराणे वर्णितानां त्रिषष्टीनां महापुरुषाणां प्रतिदिनं सौकर्येण स्मृतिः स्यादित्येतदर्थं पण्डित आशाधरः त्रिषष्टिस्मृतिं विरचयाञ्चक्रे। जैनधर्मसम्बन्धिन्या ऐतिहासिकपरम्पराया अवगमार्थं कृतिरेषोपयोगिनी भविष्यतीति विश्वसिति विरमति च विदुषामनुचरः...

**कृष्णा भगवान माळी**

---

१ प्रसिद्धाष्टसहस्रेद्धलक्षणं त्वां गिरां पतिम्।
नाम्नामष्टसहस्रेण तोष्टुमोऽभीष्टसिद्धये॥२५.९९॥ (आदिपु.)

२ प्रकाशनादिविवरणार्थं द्रष्टव्या सन्दर्भग्रन्थसूची।

# प्रस्तावना

## भारतीय पुराण साहित्य—

प्राचीन भारतीय साहित्य परम्परा में पुराण साहित्य का योगदान अमूल्य है। भारतीय साहित्य में वैदिक, जैन तथा बौद्ध परम्परा के ग्रन्थसाहित्य का अन्तर्भाव होता है। उनमें वैदिक तथा दिगम्बर जैन साहित्य में पुराण की संकल्पना है। बौद्ध परम्परा में पुराण की संकल्पना नही है।[१] जैनसाहित्य में दिगम्बर परम्परा में पुराण उपलब्ध है, श्वेताम्बर परम्परा में नही। दिगम्बर परम्परा में पुराण के जो लक्षण माने गये है उस प्रकार के लक्षणों से परिपूर्ण ऐसे चरित्र ग्रन्थ श्वेताम्बर परम्परा में आज भी विपुल मात्रा में उपलब्ध है। अतः श्वेताम्बर परम्परा में पुराण साहित्य का अभाव है, ऐसा हम नही कह सकते, केवल इस साहित्य प्रकार को श्वेताम्बर परम्परा में पुराण की संज्ञा नही दी है।

## पुराण शब्द की व्युत्पत्ति—

१) 'पुरा भवं पुराणम्' अर्थात् 'पुरानी घटनाये'। यहाँ पुरा यह अव्यय है। 'पुरति अग्रे गच्छति इति पुरा'। तुदादिगणपठित अग्र गमनार्थक पुर्[२] धातु से औणादिक 'क' प्रत्यय के योग से 'पुरा' शब्द बनता है।

२) अमरकोश में पुरा शब्द के प्रबन्ध, अतीतकाल तथा संकट यह तीन अर्थ दिये है।[३]

३) 'पुरा भवम्' इस विग्रह में पुरा अव्यय से भव इस अर्थ में ट्यु प्रत्यय[४] करने से पुराण शब्द निष्पन्न होता है, इस व्युत्पत्ति से यह स्पष्ट होता है कि अत्यन्त प्राचीन काल में जो कुछ हुआ उसे पुराण कहते है।

---

१ जैन पुराणों का सांस्कृतिक अध्ययन—डॉ. देवीप्रसाद मिश्र, प्राक्कथनम्(पत्रांक ग्यारह)।

२ पुर अग्रगमने। धातुक्रमाङ्कः १३४६। धातुरूप.।

३ स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा।[अमर. ३.३.२५३]

४ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।(पाणि.अष्टा.४.३.२३)

४) निरुक्तकार यास्क के अनुसार 'पुराणं कस्मात्? पुरा नवं भवति।' अर्थात् प्राचीन काल में जो नवीन था। यास्क के इस कथन से यह अर्थ भी ध्वनित होता है कि जो साहित्य एक ओर पुरातनी सृष्टि, विद्या वेदविद्या से अपना सम्बन्ध बनाये रखता है और दूसरी ओर नित्य नये नये रूप में उत्पन्न लोक-जीवन से अपना सम्बन्ध जोडे रहता है, वही पुराण है।

५) पुरा पूर्वक अदादि गण पठित अन[१] धातु से अच् प्रत्यय लगने से पुराण शब्द बनता है। पुरा = पुरातनम्। अनिति = जीवयति इति पुराणं[२] ग्रन्थविशेषः।

६) पुरा = अतीतान् अर्थान् अणति = कथयति इस व्युत्पत्ति में शब्दार्थक अण् धातु से पचादित्वात् अच् प्रत्यय करने से भी पुराण शब्द निष्पन्न होता है, जिसका अर्थ— प्राचीन बातों को कहने का ग्रन्थ है।

इसी अर्थ को प्रतिपादन करने वाले वचन पुराण में उपलब्ध होते है। यथा—

**यस्मात्पुरा ह्यभूच्चैतत्पुराणं तेन तत्स्मृतम्। (ब्रह्मपु.-१.१.१७३)**
**पुरा परम्परां व्यक्ति पुराणं तेन वै स्मृतम्। (पद्मपु.-१.२.५४)**
**यस्मात्पुरा ह्यनतीदं पुराणं तेन कथ्यते।**
**निरुक्तिमस्य यो वेद सर्वपापैः प्रमुच्यते॥ (वायुपु.-१.२.३)**
**पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः। (मत्स्यपु.-५३.७२)**

इन्हीं व्युत्पत्तियों से पुराण शब्द से प्राचीन घटनाओं के प्रतिपादक सभी ग्रन्थों का समावेश होता है तथापि परम्परा से पुराण शब्द से महर्षि व्यासरचित प्राचीन कथायुक्त अष्टादश ग्रन्थविशेष का ही बोध होता है। व्युत्पत्तिलभ्य अर्थ के अनुसार सभी विद्वान् एकमत से पुराण को प्राचीन ग्रन्थ-विशेष मानने है।

## पुराण एवं इतिहास एक तुलना—

इतिहासशब्दस्य व्युत्पत्तिः 'इति ह आस' अर्थात् यह ऐसे हुआ। कहा भी है कि—

---

१ अन प्राणने। अदादि। धातुक्रमाङ्कः १०७० धातुरूप.।

२ यद्यपि अच् प्रत्ययान्त होने से पुराण शब्द का प्रयोग पुल्लिंग में होना चाहिए, किन्तु 'पुराणं पञ्चलक्षणम्' (मत्स्य पु. ५३.६४) 'पुराणं ग्रन्थभेदे च क्लीवे त्रिषु पुरातने'(नानार्थ.) इनमें नपुंसकलिंग में पुराण शब्द प्रयुक्त हुआ है। अतः व्यवहार में पुराण शब्द नपुंसकलिङ्ग मान्य है।

**धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।**
**पूर्ववृत्तं कथायुक्तमितिहासं प्रचक्षते॥**[१]

इतिहास यह पुराण के समान विषय का प्रतिपादक होते हुए भी पुराण से भिन्न है। क्योंकी इतिहास में पुराण में समाविष्ट विषयों में से वंश एवं वंशानुचरित इन्हीं दो विषयों का समावेश होता है। मात्र पुराण के सर्ग, प्रतिसर्ग, वंश, मन्वंतर, वंशानुचरित आदि पाँच लक्षण होते हैं।

कवी राजशेखर काव्यमीमांसा[२] में कहते है— **तत्र वेदाख्यानोपनिबन्धनप्रायं पुराणमष्टादशधा** इति। इससे विदित होता है पुराण में बहुधा वैदिक आख्यानों का समावेश होता है और इतिहास में उनके भिन्न ग्रन्थों का। काव्यमीमांसा में कहा है की, कुछ विद्वानों के अनुसार इतिहास पुराण का ही एक अंश है — **पुराणप्रविभेद एवेतिहास इत्येके।**[३] इतिहास के दो भेद है — परिक्रिया और पुराकल्प। उनके लक्षण—

**परिक्रिया पुराकल्प इतिहासगतिर्द्विधा।**
**स्यादेकनायका पूर्वा द्वितीया बहुनायका॥**
**तत्र रामायणं भारतं चोदाहरणे।**[४]

प्राचीनकाल में पुराण और इतिहास में भेदरेखा अस्पष्ट थी, क्योंकि, महाभारत स्वयं को पुराण और इतिहास इस दोनों प्रकार से प्रतिपादित करता है[५]—

**जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा। (महा.उ.प.१३६.१८)**
**द्वैपायनेन यत्प्रोक्तं पुराणं परमर्षिणा।**
**सुरैर्ब्रह्मादिभिश्चैव श्रुत्वा यदभिपूजितम्॥(महा.आ.प.१.१७)**

अमरकोश में 'इतिहासः पुरावृत्तम्'(१.५.४) इस प्रकार इतिहास का लक्षण किया है और महाभारत के नीलकण्ठी टीका में 'पुराणं पुरावृत्तम्'(महा.१.५.१

---

१ पत्रांक १७४। संस्कृतहिन्दीकोश। के.वा.आपटे। चौखम्बा-संस्कृत-भवन। पुनर्मुद्रण २०१२।

२ द्वितीय अध्याय। पत्रांक ६।

३ काव्यमी. द्वितीय अध्याय। पत्रांक ७।

४ काव्यमी. द्वितीय अध्याय। पत्रांक ७।

५ पत्रांक-११। सं.वाङ्म. का बृ. इति.(खंड १३)।

नी.टी.) इस प्रकार वही लक्षण पुराण का किया है।[१]

श्रीमद्भागवतपुराण में पुराण और इतिहास का महत्त्व प्रतिपादित करने के लिए इनको पाँचवा वेद कहा है—

**इतिहासपुराणानि पञ्चमं वेदमीश्वरम्।**
**सर्वेभ्य एव वक्त्रेभ्यः विसृजे सर्वदर्शनः॥**[२]

साम्प्रत इतिहासकार घटनाओं के निश्चित कालक्रम को ही इतिहास कहते हैं। उससे वर्तमान और भूतकाल का सम्बन्ध समझता है। पुराण का लक्षण इससे व्यापक है यह स्पष्ट ही है।

## वैदिक परम्परानुसार पुराण का लक्षण—

अमरकोश में **'पुराणं पञ्चलक्षणम्'(१.६.५)** इस प्रकार पुराण का लक्षण किया है। वे लक्षण इस प्रकार है—

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चेति पुराणं पञ्चलक्षणम्॥(वायुपु. ४.१०)**

यहाँ सर्ग अर्थात् सृष्टि, प्रतिसर्ग = लय और पुनः सृष्टि, वंश = देव अथवा ऋषियों की वंशावली तथा वंशानुचरित = राजवंशों का इतिहास है। उपर्युक्त पाँच विषय ही पुराणों में मुख्य रूप से वर्णित हैं। वराहपुराण आदि में भी पुराण का यही लक्षण है।[३]

## वैदिक पुराण साहित्य—

वैदिक साहित्य में १८ पुराण है, ये महापुराण कहलाते है। महापुराणों के नाम इस प्रकार हैं— १. मत्स्य पुराण, २. मार्कण्डेय पुराण, ३. भागवत पुराण, ४. भविष्य पुराण, ५. ब्रह्माण्ड पुराण, ६. ब्रह्मवैवर्त पुराण, ७. ब्राह्म पुराण, ८. वामन पुराण, ९.वराह पुराण, १० विष्णु पुराण, ११. वायु पुराण, १२. अग्नि पुराण, १३. नारद पुराण, १४. पद्म पुराण, १५. लिंग पुराण, १६. गरुड पुराण, १७. कूर्म पुराण और

---

१ पत्रांक- १२। सं.वाङ्म. का बृ. इति.(खंड १३)।

२ भागवत.— ३.१२.३९।

३ सर्गश्च प्रतिसर्गश्च वंशमन्वतराणि च। सर्वेष्वेतेषु कथ्यन्ते वंशानुचरितं च तत्॥(विष्णुपु.३.६.२५)

१८. स्कन्द पुराण।

इसके अतिरिक्त १८ उपपुराण भी हैं। उपपुराणों के नाम इस प्रकार हैं— १. सनत्कुमार पुराण, २. नरसिंह पुराण, ३. स्कन्द पुराण. ४. शिवधर्म पुराण, ५. आश्चर्य पुराण, ६. नारद पुराण, ७. कपिल पुराण, ८. वामन पुराण, ९. उशनस पुराण, १०. ब्रह्माण्ड पुराण, ११. वरुण पुराण, १२. कालिका पुराण, १३. महेश्वर पुराण, १४. साम्ब पुराण, १५. सौर पुराण, १६. पराशर पुराण, १७. मारीच पुराण और १८. भार्गव पुराण।

इनके अतिरिक्त और भी अनेक पुराण उपलब्ध है।

**जैनसाहित्य में पुराणसाहित्य का स्थान—**

जैन साहित्य श्वेताम्बर तथा दिगम्बर परम्परा में समाहित है। श्वेताम्बर साहित्य में पुराण की संकल्पना नही है। वहाँ द्रव्य-गणित-धर्मकथा-चरणरूप चार अनुयोगों में धर्मकथानुयोग ही पुराण विषयक है।

दिगम्बर सम्प्रदाय के अनुसार दृष्टिवाद के पाँच अधिकार है— परिकर्म, सूत्र, प्रथमानुयोग, पूर्वगत और चूलिका। प्रथमानुयोग में पुराण समाविष्ट है।[१]

**जैन परम्परा में पुराण का लक्षण—**

आचार्य जिनसेन द्वारा प्रतिपादित पुराण की परिभाषा—

**लोको देशः पुरं राज्यं तीर्थं दानतपोऽन्वयम्।**
**पुराणेष्वष्टधाख्येयं गतयः फलमित्यपि॥(आदिपु. ४.३)**

इस परिभाषा के अनुसार पुराण के वर्ण्य-विषय ये आठ होते हैं— १. लोक, २. देश, ३. पुर, ४. राज्य, ५. तीर्थ, ६.दान व तप, ७. गति, ८ फल। इनमें प्रथम लोकाख्यान अर्थात् उद्दिष्ट ऐसे लोक की व्युत्पत्ति, उसकी दिशा तथा अन्तरालों की लम्बाई-चौडाई का वर्णन होता है।[२] लोक का कोई एक भाग देश है। उसमें

---

१ पूर्णार्घ्यः(पत्रांक २४१)।

२ लोकोद्देशनिरुक्त्यादिवर्णनं यत् सविस्तरम्।
लोकाख्यानं तदाम्नातं विशोधितदिगन्तरम्॥४.४॥(आदिपु.)

विद्यमान देश, पहाड, द्वीप, समुद्रादि के विस्तार का वर्णन-देशाख्यान है।[१] राजधानी का वर्णन-पुराख्यान है।[२] राज्यविस्तार का वर्णन राजाख्यान है।[३] अपार संसार से पार करानेवाला तीर्थ और तीर्थंकर का वर्णन-तीर्थाख्यान है।[४] दान और तप का महत्त्व दर्शानेवाली कथाओं का वर्णन-दान-तपाख्यान है।[५] गतियों का वर्णन-गत्याख्यान[६] और मोक्ष प्राप्तिपर्यन्त पुण्य-पाप-फल का वर्णन फलाख्यान[७] बताया गया है।

इस प्रकार जैन पुराणों का केन्द्रवर्ती विषय शलाका पुरुषों का जीवनचरित ही है। आचार्य श्रीहेमचंद्रसूरि कृत 'अभिधानचिन्तामणि' की व्युत्पत्तिरत्नाकर नामक टीका के कर्ता उपाध्याय श्रीदेवसागरगणि शलाकापुरुष शब्द का अर्थ 'पुरुषेषु जातरेख'(पुरुषों में श्रेष्ठ) करते है।[८] कथावलीकार आचार्य श्रीभद्रेश्वरसूरि शलाकापुरुष का अर्थ 'सम्यक्त्वरूप शलाका से युक्त' करते है।[९] जैन पारिभाषिक शब्दकोश में शलाकापुरुष को 'सर्वोत्तम पुरुष' कहा है।[१०]

आगम में सामान्यतः शलाका पुरुष के लिए 'उत्तम पुरुष'(उत्तमपुरिस) प्रयोग मिलता है, वहाँ शलाका पुरुष शब्दप्रयोग नहीं दिखता। समवायांगसूत्र में चौबीस तीर्थंकर, बारह चक्रवर्ती, नौ बलभद्र, नौ वासुदेव इस प्रकार चौवन पुरुषों

---

१ तदेकदेशदेशाद्रद्वीपाब्ध्यादिप्रपञ्चनम्।
देशाख्यानं तु तज्ज्ञेयं तज्ज्ञैः सञ्ज्ञानलोचनैः॥४.५॥(आदिपु.)

२ भरतादिषु वर्षेषु राजधानीप्ररूपणम्। पुराख्यानमितीष्टं तत् पुरातनविदां मते॥४.६॥(आदिपु.)

३ अमुष्मिन्नधिदेशोऽयं नगरं चेति तत्पतेः।
आख्यानं यत्तदाख्यातं राज्याख्यानं जिनागमे॥४.७॥(आदिपु.)

४ संसाराब्धेरपारस्य तरणे तीर्थमिष्यते। चेष्टितं जिननाथानां तस्योक्तिस्तीर्थसंकथा॥४.८॥(आदिपु.)

५ यादृशं स्यात्तपोदानमनीदृशगुणोदयम्। कथनं तादृशस्यास्य तपोदानकथोच्यते॥४.९॥(आदिपु.)

६ नरकादिप्रभेदेन चतस्रो गतयो मताः। तासां संकीर्तनं यद्धि गत्याख्यानं तदिष्यते॥४.१०॥(आदिपु.)

७ पुण्यपापफलावाप्तिजन्तूनां यादृशी भवेत्। तदाख्यानं फलाख्यानं तच्च
निःश्रेयसावधिः॥४.११॥(आदिपु.)

८ त्रिषष्टिः शलाकाभूताः शलाकापुरुषाः, पुरुषेषु जातरेखा इत्यर्थः। (अभि. चिन्ता. व्युत्प.रत्ना.टी. श्लोक-७००)

९ न य सम्मत्तसलायारहिया नियमेणिमे जओ तेण। होंति सलाया पुरिसा...॥ (कहावली, संदर्भ- चउपन्नमहापुरिसचरियं प्रस्तावना- अमृतलाल मोहनलाल भोजक, पत्र-४१)

१० शलाकापुरुष सामान्य माणसोमां सर्वोत्तमपुरुषो, २४ तीर्थंकर भगवंतो १२ चक्रवर्तीओ.... जै.पारि.श.कोश(पत्र १२९)

को उत्तम पुरुष कहा है।[1] बाद में इन्हीं उत्तम पुरुषों के लिए शलाकापुरुष संज्ञा रूढ हुई ऐसी संभावना है। आचार्य श्रीहेमचंद्रसूरि ने[2] तथा आचार्य श्रीजिनसेन के द्वारा शलाका पुरुषों की संख्या तिरसठ कही है। उपर्युक्त चौवन उत्तमपुरुषों में नौ प्रतिवासुदेवों को मिलाकर तिरसठ शलाका पुरुष होते है। आचार्य श्रीभद्रेश्वरसूरि द्वारा कथावली(कहावली) ग्रंथ में उपर्युक्त तिरसठ शलाकापुरुषों के साथ नौ नारदों को मिलाकर बहत्तर शलाका पुरुष कहे गये है।[3] प्रस्तुत कृति में तो शलाका पुरुषों की संख्या तिरसठ ही है। इस अवसर्पिणी में शांतिनाथ, कुंथुनाथ, अरनाथ तीर्थंकर भी है तथा चक्रवर्ती भी है, अतः व्यक्तिशः देखें तो शलाका पुरुषों की संख्या साठ ही है।

## जैनपुराणों का वर्ण्यविषय—

जैन पुराणों का वर्ण्य-विषय शलाकापुरुषों का उनके पूर्व भवों तथा उत्तर भवों के साथ जीवन-चरित वर्णन करना है। वे शलाका पुरुष तिरसठ है— चौबीस तीर्थंकर, बारह चक्रवर्ती, नौ बलभद्र, नौ नारायण(वासुदेव), नौ प्रतिनारायण(प्रतिवासुदेव)। किसी भी पुराण में एक अथवा उससे अधिक शलाका पुरुषों का वर्णन मिलता है। यथा— महापुराण में इन्हीं तिरसठ सत्पुरुषों का जीवनवृत्त है। पद्मपुराण में राम, लक्ष्मण और रावण का, हरिवंशपुराण में कृष्ण, बलराम और जरासंध का, वीर वर्धमान चरित में तीर्थंकर महावीर का और पाण्डवपुराण में प्राचीन दो राजवंशों कौरवों व पाण्डवों का वर्णन है।

---

१ भरहेरवएसु णं वासेसु एगमेगाए ओसप्पिणीए एगमेकाए उस्सप्पिणीए चउप्पन्नं चउप्पन्नं उत्तमपुरिसा उप्पज्जिसु वा उप्पज्जंति वा उप्पज्जिस्संति वा, तं जहा— चउवीसं तित्थकरा बारस चक्कवट्टी नव बलदेवा नव वासुदेवा।(समवायांग. ५४)

२ जिनैः सह त्रिषष्टिः स्युः शलाकापुरुषा अमी...(अभि.चिन्ता. श्लोक-७००)

३ चउवीस जिणा बारस चक्की णव पडिहरी णव सरामा।
हरिणो चक्कि-हरीसु य केसु य णव नारया होंति।।
उड्ढगई चिय जिण-राम-णारया जंतऽहोगइं चेय। सणियाणा
चिय पडिहरि-हरिणो दुहओ वि चक्कि त्ति।।
न य सम्मत्तसलायारहिया नियमेणिमे जओ तेण। होंति सलाया पुरिसा बहत्तरी...।।
—(कहावली, संदर्भः- चउपन्नमहापुरिसचरियं प्रस्तावना- अमृतलाल मोहनलाल भोजक, पत्रम्-४१)

## जैन पुराण साहित्य—

वैदिक परम्परा में जिस प्रकार पुराण और उपपुराण ऐसे दो विभाग है, वैसे जैनपुराणों के नहीं। संस्कृत, प्राकृत, अपभ्रंश, कन्नड आदि भाषाओं में पचास से भी अधिक जैनपुराण उपलब्ध है। पद्मपुराण, हरिवंशपुराण, महापुराण, उत्तरपुराण यह संस्कृत के प्रमुख जैनपुराण है। तिलोयपण्णत्ति, पउमचरिउ, चउपन्नमहापुरिस-चरित्त, कहावली यह प्राकृत के प्रमुख जैनपुराण है। अपभ्रंश भाषा में उपलब्ध जैन पुराण स्वयंभू रचित पउमचरिउ, हरिवंशपुराण/ रिट्ठणेमिचरिउ, धवलरचित हरिवंश पुराण, यशकीर्तिरचित हरिवंशपुराण, पुष्पदंत तिसट्ठि महापुरिस गुणालंकार इस प्रकार है।

यहाँ कुछ प्रमुख जैन पुराण ग्रन्थों का ही निर्देश किया है। इनके साथ ही और भी पुराणग्रन्थों के नाम, उनके कर्ता तथा रचना काल को दर्शाने वाला कोष्टक संस्कृत वाङ्मय का बृहद् इतिहास(खण्ड द्वादश) इस ग्रन्थ से उद्धृत(प्रस्तावना के बाद) किया है।

अन्य पुराणों की अपेक्षा जैन पुराण साहित्य में इतिवृत्त की यथार्थता सुरक्षित दिखती है। अत एव विद्वानों की मान्यता है कि पुराणकालीन भारतीय परिस्थितियों को जानने के लिए जैन पुराणों से प्रमाणित सहायता प्राप्त होती है।[१]

## त्रिषष्टि स्मृतिशास्त्र सटीक—

स्मृ धातु को क्तिन् प्रत्यय करने से ‘स्मृतिः’ शब्द निष्पन्न होता है। पण्डित आशाधर ने प्रत्यास्मरण[२] इस अर्थ में इस शब्द का उपयोग किया है। प्रस्तुत ग्रन्थ में महापुराण के आधार से सङ्क्षेप से तिरसठ शलाका पुरुषों का चरित वर्णन किया है। महापुराण दो खण्डों में विभक्त है— आदिपुराण अथवा पूर्वपुराण एवं उत्तरपुराण। आदिपुराण ४७ पर्वयुक्त है। उसमें से आदि ४२ पर्व तथा ४३ वे पर्व के आदि ३ श्लोक यहाँ तक की रचना भगवान जिनसेनाचार्य द्वारा की गयी तथा अवशिष्ट पाँच पर्व और उत्तरपुराण श्रीजिनसेनाचार्य के प्रमुख शिष्य श्रीगुणभद्राचार्य के द्वारा विरचित है।

---

१ पत्रांक-१२। सं. वाङ्म. का बृ. इति.(खण्डः १३)।

२ ग्रन्थकर्ता को तिरसठ शलाका पुरुषों का स्मरण अभिप्रेत है।

**ग्रन्थरचना प्रयोजन—**

आशाधर द्वारा शिक्षित जाजाक नामक पण्डित ने नित्यस्वाध्याय के लिए अतिविस्तृत पुराणों का सङ्क्षेप करने की प्रार्थना करने पर पण्डित आशाधर ने इस ग्रन्थ की रचना की इस प्रकार प्रशस्ति में उल्लेख मिलता है।[१] तिरसठ शलाका पुरुषों के प्रतिदिन स्मरण के लिए लघुश्लोकपरिमाण ऐसा यह ग्रन्थ है। इस ग्रन्थ में सभी शलाका पुरुषों का वर्णन संक्षेप से होने से ग्रन्थपठन से उन सभी का स्मरण होता है अतः 'त्रिषष्टिस्मृतिः' यह ग्रन्थ का नाम सार्थक है।

**ग्रन्थरचना समय एवं स्थल—**

विक्रम संवत् १२९२ में परमारवंशीय राजा देवपाल के पुत्र जैतुगिदेव जब अवन्ती के अधिपति थे तब नलकच्छ नगर के नेमनाथ-चैत्य में प्रस्तुत ग्रन्थ की रचना हुई।[२]

**ग्रन्थ की आदर्श हस्तप्रति—**

प्रस्तुत ग्रन्थ की आदर्शप्रति खण्डेलवाल(स्कन्दपाल?)वंशीय महणकमलश्रीपुत्र धीनाक ने लिखी। ग्रन्थ की प्रशस्ति में लेखक का उल्लेख किया गया है।[३]

**४. प्रशस्ति में प्राप्त अन्य ग्रन्थों का उल्लेख—**

धर्मामृत तथा भरतेश्वराभ्युदयमहाकाव्य इन दो ग्रन्थों का उल्लेख प्रशस्ति में मिलता है।[४]

---

१ सङ्क्षिप्यतां पुराणानि नित्यस्वाध्यायसिद्धये। इति पण्डितजाजाकाद्विज्ञप्तिः प्रेरिकात्र मे॥९॥

२ प्रमारवंशवार्धीन्दुदेवपालनृपात्मजे।
श्रीमज्जैतुगिदेवेऽसिस्थाम्नावन्तीमवत्यलम्॥१२॥ (त्रि.स्मृ.प्रश.)
नलकच्छपुरे श्रीमन्नेमिचैत्यालयेऽसिधत्। ग्रन्थोऽयं द्वि-नव-द्व्ये
कविक्रमार्कसमात्यये॥१३॥(त्रि.स्मृ.प्रश.)

३ खण्डिल्यवंशे महणकमलश्रीसुतः सदृक्।
धीनाको वर्धतां येन लिखितास्याद्यपुस्तिका॥१४॥ (त्रि.स्मृ.प्रश.)

४ धर्मामृतादिशास्त्राणि कुशाग्रीयधियामिव।
यः सिद्ध्यङ्कं महाकाव्यं रसिकानां मुदेऽसृजत्॥६॥ (त्रि.स्मृ.प्रश.)

## त्रिषष्टिस्मृति ग्रन्थ स्वरूप—

ग्रन्थ का आरम्भ भगवान महावीर, इन्द्रभूति गणधर एवं तिरसठ शलाका पुरुषों को नमस्कार कर के संक्षेप से महापुराण के कथन की प्रतिज्ञा से होता है। इस ग्रन्थ में प्रत्येक तीर्थंकर के लिए एक इस प्रकार चौबीस विभाग है। आदि और अन्तिम तीर्थंकर का वर्णन विस्तृत है। बीसवे प्रकरण में महाभारत एवं बाईसवे प्रकरण में रामायण का संक्षेप से वर्णन है। अन्यत्र सामान्यतः तीर्थंकरों के विरक्ति का कारण, उनके पूर्व दो भवों का वर्णन, उनके शासन काल में विद्यमान चक्री आदि तिरसठ शलाका पुरुषों का वर्णन है। उच्चस्तरीय भाषा, अप्रचलित शब्दों का प्रयोग ग्रन्थकर्ता के वैदुष्य को अभिव्यक्त करता है। अनुष्टुप् छन्दोबद्ध इस ग्रन्थ में कहीं कहीं आर्यादि वृत्त भी दिखते है। आदि-उत्तरपुराण की श्लोकसंख्या सामान्यतः बीस हजार श्लोक है। केवल ४९५ श्लोक में उनका सार प्रस्तुत ग्रन्थ में निबद्ध करना यह ग्रन्थकर्ता के पाण्डित्य को दर्शाता है।

## कर्ता परिचय- पण्डितप्रवर आशाधर—

शाकम्भरी देशीय सपादलक्ष[१] नगरी में माण्डलदुर्ग(मांडलगढ/मंडलगढ) में निवास करते थे। वे व्याघ्रेरवाल(बघेरवाल)वंशीय जैन धर्म के अनुयायी श्रावक थे। सल्लक्षण अभिधानक उनके पिता माण्डलदुर्ग के दुर्गपती थे।[२] उनकी माता का नाम रत्नी था। ईसवीय ११९३ में शहावुद्दिन घोरी[३] नामक यवन शासक ने चाहमान(चौहान)वंशीय राजा पृथ्वीराज की हत्या कर के देहली स्वाधीन की। उसके

---

१ चौहान काल में(ईसवीय ग्यारहवी - तेरहवी शताब्दी) जयपुर प्रान्त(district) में (जयपुरनगर से ४५ किलोमीटर के अन्तर पर) सपादलक्ष नगरी थी। वह नगरी आज नागौर नाम से प्रसिद्ध है।

२ श्रीमानस्ति सपादलक्षविषयः सा(शा)कम्भरीभूषण-
स्तत्र श्रीरतिधाममण्डलकरं नामास्ति दुर्गं महत्।
श्रीरत्न्यामुदपादि तत्र विमलव्याघ्रेरव्यालान्वया-
च्छ्रीसल्लक्षणतो जिनेन्द्रसमयश्रद्धालुराशाधरः॥१॥(त्रि.स्मृ.प्रश.)

३ घोरीवंशीय शहावुद्दिन(साहब-उद्-दिन मुहम्मद घोरी) बारहवी-तेरहवी (११६२-१५/०३/१२०६) सदी में वर्तमान के अफगानिस्थान-पाकिस्थान-भारत के उत्तरीय प्रदेश का शासक था। उसने ईसवीय ११७५ में मुलतानप्रदेश म्लेच्छशासक से जीत लिया। ईसवीय ११७९ में गुजरातप्रदेश के चालुक्यवंशीय बाल राजा भीमदेव(११७८-१२४१) की माता नायकी देवी ने घोरी को युद्ध में पराजित किया।

बाद अजयमेरु(अजमेर)दुर्ग आक्रान्त कर के उद्ध्वस्त किया। इस आक्रमण से त्रस्त सल्लक्षण स्वीय परिवार के साथ अन्य लोगों को लेकर निज जन्मभूमि का त्याग कर के धारा नगरी में परमार नरेशों के आश्रय में रहे। वहाँ भी धाराधीशों के कृपापात्र होकर राज्य की सेवा में उन्नति करते हुए राजा अर्जुनवर्मा के समय(वि. सं. १२६७-१२७५, ईसवीय १२१०-१२१८) में मालवराज्य[१] के सान्धिविग्रहिक मन्त्री(परराष्ट्र सचिव) हुए।[२]

धारानगरी में पं. आशाधर ने पण्डित महावीर से शिक्षा प्राप्त कर के विविध विषयों में पाण्डित्य प्राप्त किया। शास्त्राध्ययन एवं साहित्य की साधना के उद्देश से वे धारा नगरी को त्याग कर उसके निकटवर्ति नलकच्छपुर(नालछा) में जा कर रहें।[३] वहाँ स्वयं स्थापित किये विद्यापीठ में रहते हुए उन्होने(वैक्रमीय १२८२-१३०२, ईसवीय १२२५-१२४५) विविधविषयों का अध्ययन किया तथा ४० ग्रन्थों की निर्मिति की। तत्कालिक जैन-अजैन विद्वानों ने उन्हें नयविश्वचक्षु, प्रज्ञापुञ्ज, कविराज, कविकालिदास, सरस्वतीपुत्र, आचार्यकल्प, सूरि इत्यादि अनेक सार्थक उपाधियों से अलङ्कृत किया। अनेक गृहस्थ, त्यागी मुनिवर आशाधर के विद्याशिष्य थे। उनमें उदयसेन मुनि, वादीन्द्र विशालकीर्ति आशाधर से न्यायशास्त्र का अध्ययन कर के वादविजय में समर्थ हुए। शासनचतुर्विंशतिका के कर्ता

---

१ साम्प्रत मध्यप्रदेश तथा पश्चिम-दक्षिण-राजस्थान के कुछ प्रान्त(district) को व्यापृत करने वाला प्रदेश। वह विन्ध्य पर्वत के उत्तर में स्थित निमारप्रान्त के भी कुछ प्रदेश को व्यापृत करता था। प्राचीन काल मे मालव प्रान्त स्वतन्त्रः था। वहाँ अवन्ती-मौर्य-गुप्त-परमार-मालवसुलतान-मुघल-मराठा आदि का शासन था।

मालव अथवा मोहोल इस प्रदेश का ईसवीय सातवी सदी के ह्रुआन-झँग नामक चीनी-पर्यटक ने जो उल्लेख किया है वह स्पष्ट रूप से आज के गुजरातप्रदेश का निर्देश करता है।

राष्ट्रकूटवंशीय सम्राट ने परमारवंशीयों को मालवप्रदेश के प्रशासक के रूप में नियुक्ति की। दसवी सदी के उत्तरार्ध से वहाँ परमारवंशीयों का शासन था। परमारवंशीयों द्वारा वहाँ धारा नाम की राजनगरी प्रस्थापित की गयी। राजा भोज(ईसवीय १०१०-१०६०) इसी प्रदेश का शासक था।

२ म्लेच्छेशेन सपादलक्षविषये व्याप्ते सुवृत्तक्षति-
त्रासाद्विन्ध्यनरेन्द्रदोः परिमलस्फूर्जत्त्रिवर्गौजसि।
प्राप्तो मालवमण्डले बहुपरीवारः पुरीमावसन्
यो धारामपठज्जिनप्रमितिवाक्शास्त्रे महावीरतः॥३॥(त्रि.स्मृ.प्रश.)

३ श्रीमदर्जुनभूपालराज्ये श्रावकसङ्कुले। जिनधर्मोदयार्थं यो नलकच्छपुरेऽवसत्॥४॥(त्रि.स्मृ.प्रश.)

यतिपति मदनकीर्ति, पण्डित देवचन्द्र इन्होंने उनसे व्याकरण की शिक्षा ली। भट्टारक विनयचन्द्र ने उनसे धर्मशास्त्र का ज्ञान लिया। इन्हीं विनयचन्द्र के द्वारा विनति करने पर आशाधरजी ने इष्टोपदेशटीका की रचना की। भव्यकण्ठाभरणपञ्चिका-पुरुदेवचम्पू-मुनिसुव्रत इन काव्यों के कर्ता कवि अर्हदास तथा पण्डित जाजाक ने आशाधर के ग्रन्थों से बोध प्राप्त किया। राज्य के प्रधान अमात्य बिल्हणकवीश, बालसरस्वती, महाकवि मदनोपाध्याय अजैन होते हुए भी आशाधरजी की अतीव प्रशंसा करते है। खण्डेलवालवंशीय महात्मा हरदेव[१], पौरपाटान्वय(परवार/पोरवाड) समुद्धरश्रेष्ठिपुत्र महीचन्द्रसाहु, खण्डेलवालवंशीय केल्हण, श्रावक धनचन्द्र तथा खण्डेलवालवंशीय महणकमलश्रीपुत्र धीनाक ये पं. आशाधर के प्रमुख गृहस्थ भक्त थे। उनके द्वारा विनति करने पर आशाधर जी ने बहुत ग्रन्थों की रचना की।

उनको सरस्वती नामक पत्नी एवं छाहड नामक पुत्र था। स्व-पितामह मन्त्रीश्वर सल्लक्षण से प्रशिक्षण प्राप्त कर के पं. आशाधर राजा अर्जुनवर्मा के प्रिय हुए।[२]

अपनी आयु के उत्तरार्ध में आशाधरजी भोगों से विरत होकर उदासीन व्रति श्रावक के रूप में आत्मसाधना में निरत रहे।

## ग्रन्थरचना[३]—

१) **अध्यात्मरहस्यम्**— आशाधर कवि ने पिता की आज्ञा से ७२ श्लोकप्रमाण इस ग्रन्थ की रचना की। अजमेर के हस्तप्रत भण्डागार से प्राप्त प्रत के आधार से इस ग्रन्थ का प्रकाशन वीरसेवामन्दिर से किया गया। इस ग्रन्थ में आत्मा-परमात्मा तथा उनके परस्पर सम्बन्ध के यथार्थ वस्तुस्थिति के रहस्य का उद्घाटन किया है। आचार्य कुन्दकुन्दाचार्य ने बहिरात्मा, अन्तरात्मा तथा परमात्मा इस प्रकार आत्मा का त्रैविध्य कहा किन्तु आशाधरजी ने स्वात्मा,

---

१ अल्हणस्य प्रपौत्रः, पापाभिधस्य पौत्रः, पद्मसिंहस्य भ्रातृव्यः, बहुदेवस्य पुत्र उदयदेवस्तम्भदेवयोः ज्येष्ठो भ्राता आसीत्।(अल्हण-पापा-पद्मसिंहबहुदेवौ-हरदेव-उदयदेव-स्तम्भदेवाः इति वंशपरम्परा)

२ सरस्वत्यामिवात्मानं सरस्वत्यामजीजनत्।
यः पुत्रं छाहडं गुण्यं रञ्जितार्जुनभूपतिम्॥२॥ (त्रि.स्मृ.प्रश.)

३ सामान्यतः श्रीदेवर्धिप्रणीत जैनग्रन्थकारकोश से यह विषय उद्धृत किया है। द्वितीय परिच्छेद-दिगम्बरपरम्परा (पत्राङ्क-१२) इसके अतिरिक्त हमारे द्वारा जोडी गयी जानकारी ग्रन्थ के श्लोक के सन्दर्भ के साथ दी है।

शुद्ध-स्वात्मा तथा परब्रह्म इस तरह त्रिविध आत्मा कहा तथा उनका स्वरूप एवं प्राप्ति कैसे कर सकते है इसका भी निरूपण किया।

२) **अनगारधर्मामृतम्**— यह ग्रन्थ ९५४ श्लोकपरिमित है।

३) **अनगारधर्मामृत-भव्यकुमुदचन्द्रिका टीका**— धनचन्द्र एवं हरिदेव इनकी प्रेरणा से १२,२०० श्लोकपरिमित इस टीका की रचना वि.सं. १३०० में कार्तिकशुक्ल ५ सोमवार को पूर्ण हुई। माणिकचन्द-ग्रन्थमाला में ईसवीय १९१६ में यह टीका प्रकाशित हुई।

४) **अभिषेकविधि/नित्यमहोद्यात**— श्रुतसागरसूरि के टीका के साथ यह ग्रन्थ प्रकाशित है। भगवान जिनों के महाभिषेक से सम्बन्धित यह शास्त्र है।

५) **अमरकोशटीका**— अमरसिंह के प्रसिद्ध अमरकोश पर यह टीका है. जो साम्प्रत अप्राप्य है।

६) **अष्टाङ्गहृद्द्योतिनी टीका**— अप्राप्य।

७) **आराधनासारटीका**— देवसेन के प्राकृत-आराधनासार की यह सप्त पत्रात्मिका सङ्क्षिप्त टीका वि.सं. १५८१ में रची गयी। यह टीका मुनिविनयचन्द्र के उपरोध से की गयी। आमेर के भाण्डार में यह टीका उपलब्ध है।

८) **इष्टोपदेशटीका**— यह टीका आचार्य पूज्यपाद देवनन्दी के प्रसिद्ध ग्रन्थ की टीका है, यह टीका सागरचन्द्रशिष्य मुनि विनयचन्द्र के अनुरोध से रची है तथा यह टीका वीरसेवामन्दिर से हिन्दिटीका सहित प्रसिद्ध की है।

९) **काव्यालङ्कारटीका**— रुद्रट के काव्यालङ्कार इस प्रसिद्ध ग्रन्थ की यह टीका है।

१०) **क्रियाकलाप**— इस ग्रन्थ की ५२ पत्रात्मिका प्रति ऐ. पन्नालाल दिगम्बर जैन सरस्वती भवन, मुम्बई यहाँ सङ्ग्रहित है।

११) **जिनयज्ञकल्प**— यह ग्रन्थ प्रसिद्ध है किन्तु इसकी स्वोपज्ञ टीका अप्राप्य है। इस ग्रन्थ में प्रतिष्ठा सम्बन्धि क्रियाओं का विस्तृत वर्णन है। महाकवि

आशाधर ने वि.सं. १२८५ में इस ग्रन्थ की रचना परमारवंशीय देवपाल राजा के राज्य में नलकच्छपुर में नेमिनाथ चैत्यालय में पापासाधु के अनुरोध से की।[१]

१२) **जिनयज्ञकल्पटीका**— यह टीका अप्राप्य है।

१३) **त्रिषष्टिस्मृतिशास्त्र**— १९३७ में इस ग्रन्थ का मराठी भाषान्तर सहित प्रकाशन हुआ किन्तु साम्प्रत यह पुस्तक अनुपलब्ध है। जिनसेन-गुणभद्र इनके महापुराण का साररूप यह ग्रन्थ है।

१४) त्रिषष्टिस्मृतिटीका-पञ्जिका।[२]

१५) **प्रमेयरत्नाकर**— यह तर्कशास्त्रविषयक पद्यग्रन्थ है। यह ग्रन्थ अप्राप्य है।

१६) बृहच्छान्तिकाभिषेक।

१७) **भरतेश्वराभ्युदय**[३]— इस काव्य में हर एक सर्ग के अन्त में 'सिद्धि' शब्द का उपयोग किया है अतः इसी का अपर नाम सिद्धचक्र प्रसिद्ध हुआ है। स्वकल्याण हेतु आशाधरजी ने इस कृति की रचना की।[४]

१८) **भूपालचतुर्विंशतिकाटीका**— भूपाल कवि के चतुर्विंशतिस्तोत्र की यह टीका है, उपर्युक्तविनयचन्द्रमुनि के लिए यह टीका की गयी, यह भी मुम्बई से प्रकाशित हुई है।

---

१ विक्रम वर्ष सपञ्चाशीति द्वादशशतेष्वतीतेषु। आश्विनसितान्त्यदिवसे साहसमल्ला पराख्यस्य।
श्रीदेवपाल नृपतेः प्रमारकुलशेखरस्य सौराज्ये। नलकच्छपुरे सिद्धो ग्रन्थोऽयं नेमिनाथचैत्यगृहे॥२०॥
—जिनयज्ञ. प्रश.।

२ अस्योल्लेखो त्रिषष्टिस्मृतौ जिनरत्नकोशेऽपि प्राप्यते।
सोऽहमाशाधरः कण्ठमलङ्कर्तुं सधर्मणाम्।
पञ्जिकालङ्कृतं ग्रन्थमिमं पुण्यमरीरचम्॥७॥ (त्रि. स्मृ.प्रश.)

३ यः सिद्ध्यङ्कं महाकाव्यं रसिकानां मुदेऽसृजत्॥६॥
टिप्पणि-सिद्धिशब्दोऽङ्कं सर्गे चिह्नं भरतेश्वराभ्युदय सत्काव्यम्। (त्रि. स्मृ.प्रश.)

४ सिद्ध्यङ्कं भरतेश्वराभ्युदयसत्काव्यं निबन्धेज्वलं
यस्त्रैविद्यकवीन्द्रमोदनसहं स्वश्रेयसेऽरीरचत्।
योऽर्हद्वाक्यरसं निबन्धरुचिरं शास्त्रं च धर्मामृतं
निर्माय न्यदधान्मुमुक्षुविदुषामानन्दसान्द्रे हृदि॥११॥
(सा.धर्मा.प्रश., पण्डितप्रवर आशाधरः, पत्राङ्कः २७२)

१९) **मूलाराधनाटीका**— शिवार्य के प्राकृत ग्रन्थ भगवती-आराधना की यह टीका है। अपराजितसूरि के टीका से युक्त ऐसे इस ग्रन्थ का प्रकाशन हुआ है।

२०) **योगदीपिका।**

२१) **रत्नत्रयविधान**— सल्लक्षणपुर के निवासि परमार वंशीय राजा देवपाल(साहसमल्ल) के राज्य में कोशविभाग में नियुक्त नागदेव की प्रेरणा से नागदेव की पत्नी के लिए कवि ने गद्यपद्यमिश्रित इस ग्रन्थ की रचना की।[1]

२२) **राजीमतिविप्रलम्भ**— राजुल अर्थात् भगवान नेमिनाथ का वैराग्यवर्णन इस ग्रन्थ में किया गया है। खण्डकाव्यस्वरूप इस ग्रन्थ की स्वोपज्ञटीका सहित रचना १२९६ में सम्पन्न हुई। किन्तु यह ग्रन्थ भी अद्य यावत् अप्राप्य है।

२३) **श्रावकाचार।**

२४) **सहस्रनामस्तवनटीका**— यह ग्रन्थ स्वोपज्ञविवृत्तिसहित श्रुतसागरसूरि की टीका तथा हिन्दीटीका के साथ भारतीय ज्ञानपीठ से प्रसिद्ध हुआ है। इस टीका की प्रति मुनिविनयचन्द्र ने लिखी है। इस कृति में जिन(तीर्थंकर) के १००८ नाम १४३ श्लोकों में बद्ध किये है। आचार्य जिनसेन ने महापुराण के २५ वे पर्व में ९९वे श्लोक में १००८ लक्षणों से युक्त होने से जिन की पूजा १००८ नामों से करते है ऐसा उल्लेख किया है।[2]

२५) **सागारधर्मामृत**— कवि आशाधर ने पौरपाटान्वयी महीचन्दसाधु की प्रेरणा से सागारधर्म के वर्णनपरक इस ग्रन्थ की रचना की। महीचन्द साधु ने ही प्रस्तुत ग्रन्थ का प्रथम पुस्तक लिखा।

२६) **सागारधर्मामृत-भव्यकुमुदचन्द्रिका टीका**— ४५०० श्लोकप्रमाण इस टीका की रचना वि.सं. १२९६ में पौषकृष्णपक्ष ७ सप्तमी तिथि शुक्रवार को पूरी की गयी।

---

१ विक्रमार्क द्व्यशीत्यग्रद्वादशाब्दशतात्यये। दशम्यां पश्चिमे(भागे) कृष्णे प्रयतां कथा॥८॥
पत्नी श्रीनागदेवस्य नन्द्याद्धर्मेण यायिका।
तासीद्रत्नत्रयविधिचरतीनां पुरस्सरी॥९॥ (रत्नत्रय.प्रश.)

२ प्रसिद्धाष्टसहस्रेद्धलक्षणं त्वां गिरां पतिम्।
नाम्नामष्टसहस्रेण तोष्टुमोऽभीष्टसिद्धये॥२५.९९॥ (आदिपु.)

२७) **ज्ञानदीपिका**— प्रस्तुत ग्रन्थ सागार-अनगारधर्मामृत की स्वोपज्ञ पञ्जिका(टीका) है, जो अप्राप्य है।

२८) **सिद्धचक्रपूजा।**

—(जिनरत्न. ३२१/३९४/२८५/१४/४३६)

ग्रन्थकर्ता आशाधर एवं उनके ग्रंथ इस विषय विषय पर अधिक विवरण 'पण्डितप्रवर आशाधार' और 'पण्डित आशाधर व्यक्तित्व और कर्तृत्व' पुस्तकों में देखें।[१]

## उपसंहार—


भारतीय साहित्य में पुराणसाहित्य अतीव महत्त्वपूर्ण है। वैदिक पुराणसाहित्य कि तरह जैन पुराणसाहित्य भी समृद्ध है। तिरसठ शलाकापुरुष अथवा उनमें से किसी एक पुरुष के जीवन का वर्णन पुराणों का प्रतिपाद्य विषय होता है। महापुराण में वर्णित तिरसठ महापुरुषों का प्रतिदिन स्मरण हों इसलिए पण्डित आशाधर ने त्रिषष्टिस्मृति की रचना की। जैन धर्म के विषय में परम्परा, इतिहास के विषय में अवगम करने के लिए यह ग्रंथ अत्यंत उपयोगी होगा ऐसा विश्वास करते है और विराम लेते है, विदुषामनुचर...

**कृष्णा भगवान माळी**

---


१ इन पुस्तकों का प्रकाशनादि विवरण के लिए देखें परिशिष्ट-संदर्भग्रंथसूची।

# १. भारतीयपुराणसाहित्य[१]




१ वैदिकपरम्परा की तरह जैनपरम्परा में पुराणों का विभाजन नहीं किया है लेकिन संस्कृतेतर भाषाओं में भी जैनपुराण उपलब्ध है। यहाँ पुराण के भेद भाषानुरूप बताये है। तृतीय तालिका में उनका निर्देश किया है अतः यहाँ उनका नामनिर्देश नही किया है।

## २. जैनसाहित्य में पुराण का स्थान



# ३. जैनपुराणसाहित्य

| क्र. | पुराण नाम | कर्ता | रचना काल |
|---|---|---|---|
| १ | पद्मपुराण- पद्मचरित | आचार्य रविषेण | ७०५ |
| २ | महापुराण- आदिपुराण | आचार्य जिनसेन | नौवी शती |
| ३ | उत्तर पुराण | गुणभद्र | १० वीं शती |
| ४ | अजित पुराण | अरुण मणि | १७१६ |
| ५ | आदि पुराण (कन्नड) | कवि पंप | - |
| ६ | आदि पुराण | भट्टारक चन्द्रकीर्ति | १७ वीं शती |
| ७ | आदि पुराण | भट्टारक सकलकीर्ति | १५ वीं शती |
| ८ | उत्तर पुराण | भट्टारक सकलकीर्ति | १५ वीं शती |
| ९ | कर्णामृत पुराण | केशवसेन | १६०८ |
| १० | जयकुमार पुराण | ब्र. कामराज | १५५५ |
| ११ | चन्द्रप्रभ पुराण | कवि अगासदेव | - |
| १२ | चामुण्ड पुराण (कन्नड) | चामुण्डराय | श.सं. ९८० |
| १३ | धर्मनाथ पुराण (कन्नड) | कवि बाहुबली | - |
| १४ | नेमिनाथ पुराण | ब्र. नेमिदत्त | १५७५ के लगभग |
| १५ | पद्मनाभपुराण | भट्टारक शुभचन्द्र | १७ वीं शती |
| १६ | पउमचरिउ (अपभ्रंश) | चतुर्मुख देव | - |
| १७ | पउमचरिउ | स्वयंभू देव | - |
| १८ | पद्मपुराण | भट्टारक सोमतेन | - |
| १९ | पद्मपुराण | भट्टारक धर्मकीर्ति | १६५६ |
| २० | पद्मपुराण (अपभ्रंश) | कवि रइधू | १५-१६ शती |
| २१ | पद्मपुराण | भट्टारक चन्द्रकीर्ति | १७ वीं शती |
| २२ | पद्मपुराण | ब्रह्म जिनदास | १३-१६ शती |
| २३ | पाण्डव पुराण | भट्टारक शुभचन्द्र | १६०८ |
| २४ | पाण्डव पुराण (अपभ्रंश) | भट्टारक यशकीर्ति | १४९७ |
| २५ | पाण्डव पुराण | भट्टारक श्रीभूषण | १६५८ |
| २६ | पाण्डव पुराण | वादिचन्द्र | १६५८ |

| | | | |
|---|---|---|---|
| २७ | पार्श्वपुराण (अपभ्रंश) | पद्मकीर्ति | ९८६ |
| २८ | पार्श्वपुराण | कवि रइधू | १५-१६ शती |
| २९ | पार्श्वपुराण | चन्द्रकीर्ति | १६५४ |
| ३० | पार्श्वपुराण | वादिचन्द्र | १६५८ |
| ३१ | महापुराण | आचार्य मल्लिषेण | ११०४ |
| ३२ | महापुराण (अपभ्रंश) | महाकवि पुष्पदन्त | - |
| ३३ | मल्लिनाथपुराण (कन्नड) | कवि नागचन्द्र | - |
| ३४ | पुराणसार | श्रीचन्द्र | - |
| ३५ | महावीरपुराण (वर्धमान चरित) | असग | ९१० |
| ३६ | महावीरपुराण | भट्टारक सकलकीर्ति | १५ वीं शती |
| ३७ | मल्लिनाथपुराण | सकलकीर्ति | १५ वीं शती |
| ३८ | मुनिसुव्रतपुराण | ब्रह्म कृष्णदास | - |
| ३९ | मुनिसुव्रतपुराण | भट्टारक सुरेन्द्रकीर्ति | - |
| ४० | वागर्थसंग्रहपुराण | कवि परमेष्ठी | आ. जिनसेन के महापुराण से प्राक् |
| ४१ | शान्तिनाथ पुराण | असग | ९१० |
| ४२ | शान्तिनाथ पुराण | भट्टारक श्रीभूषण | १६५६ |
| ४३ | श्रीपुराण | भट्टारक गुणभद्र | - |
| ४४ | हरिवंशपुराण | पुन्नाट संघीय जिनसेन | श.सं. ७०५ |
| ४५ | हरिवंशपुराण (अपभ्रंश) | स्वयंभू देव | - |
| ४६ | हरिवंशपुराण | चतुर्मुख देव | तदैव |
| ४७ | हरिवंशपुराण | ब्रह्म जिनदास | १६-१६ शती |
| ४८ | हरिवंशपुराण | तदैव | भ. यशकीर्ति १५०७ |
| ४९ | हरिवंशपुराण | भट्टारक श्रुतकीर्ति | १५५२ |
| ५० | हरिवंशपुराण | महाकवि रइधू | १५-१६ शती |
| ५१ | हरिवंशपुराण | भट्टारक धर्मकीर्ति | १६७१ |
| ५२ | हरिवंशपुराण | कवि रामचन्द्र | १५६० के पूर्व |

श्रीमदाशाधरविरचिता

# ॥त्रिषष्टिस्मृतिः॥

**श्रीमदाशाधरविरचिता**

# ॥त्रिषष्टिस्मृतिः॥

**॥ॐ नमः सिद्धेभ्यः॥**

**वीरं नत्वेन्द्रभूतिं च त्रिषष्ठि(ष्टि)[१]श्रेष्ठपुंश्रितम्[२]।**
**इतिवृत्तं[३] ब्रुवे स्मृत्यै समासेन[४] यथागमम्॥१॥[१]**

**द्वीपेऽस्मिन्[५] गन्धिले[६] सिंहपुरे[७] दृष्ट्वा खगेट्श्रियम्[८]।**
**कुर्वन्निदानं[९] बालर्षि[१०]र्जयवर्मोरगान्मृतः[११]॥२॥[२]**

**तद्वेदा(वैता?)ढ्ये[१२]ऽलकेन्द्रोऽभून्नामार्थाभ्यां महाबलः।**
**स्वयम्बुद्धाप्तधर्मोऽसावीशाने ललिताङ्गकः॥३॥[३]**

**भूत्वा व्याघ्रेण संन्यासात्पुरोधोदण्डि[१३]मन्त्रिभिः।**
**दानादार्यैर्वृतस्तज्जैः[१४] शं स्वयम्प्रभया[१५]ऽन्वभूत्॥४॥[४]**

---

१ हस्तप्रतौ सर्वत्र त्रिषष्ठिः इत्येव लिखितमस्ति।

२ =श्रेष्ठि(ष्ठ)पुमांसः शलाकापुरुषाः।

३ =महापुराणम्।

४ =विस्तरस्त्वार्षपुराणसारादौ द्रष्टव्यः।

५ =जम्बूद्रुमाङ्के अधिकारोऽयम्।

६ =अपरविदेहस्थे देशे।

७ =तत्समीपे वने।

८ =महीधराख्यखगेन्द्रस्याकाशे गच्छतो विभूतिम्।

९ =अनेन तपसा ईदृशा भोगा मे भवान्तरे भूयासुरिति ध्यायन्।

१० =नवसंयतत्वादज्ञातसमयस्थितो निदानं कुर्वन्ननेन रहस्यः ऋषिः श्रीषेणाख्येन स्वपित्रा प्रव्रजता श्रीवर्मनाम्ने अनुजाय राज्ये दत्ते सञ्जातनिर्वेदः सन् स्वयम्प्रभस्वयम्प्रभमुनिपार्श्वे प्रवजितः व्यासस्त्वार्षे पञ्चमे पर्वणि।

११ =सर्पदशनात्।

१२ =गन्धिलाविजयार्धे।

१३ =सेनापति।

१४ =प्रीतिवर्धननृपदानानुमोदनप्राप्तार्यत्वैः।

१५ =सह।

**सोऽभूदुत्पलखेटेशो वज्रजङ्घोऽस्य सा[१] प्रिया।**
**ते व्याघ्रादिचरा मन्त्रिश्रेष्ठिसेनेट्पुरोधसः[२]॥५॥[५]**

**मन्त्री मतिवरः श्रेष्ठी धनमित्रः पुरोहितः।**
**आनन्दोऽकम्पनः सेनेड्वज्रस्य[३] श्रीमती प्रिया[४]॥६॥[६]**

**तौ दम्पती[५] मृतौ[६] धूमादृषिदानादुदक्कुरौ[७]।**
**जाता व्याघ्रक्रोड[८]कीश[९]नकुलाश्च तदिष्टितः[१०]॥७॥[७]**

**द्वितीय[११]कोपादिबद्धायुष्का व्याघ्रादयस्तदा[१२]।**
**वनादेत्यनृपावासाद्बहिस्तस्थुर्मुनीक्षिणः॥८॥[८]**

**तस्मिन्वि[१३]शुद्धदृग्लाभाच्छ्रीमत्याप्यार्यकैः समम्।**
**श्रीधरो वज्रजङ्घार्यो भूत्वेशाने स्फुरत्तराम्॥९॥[९]**

**स[१४] जातु स्वगुरुं[१५] प्राप्तकैवल्यं[१६] प्राच्र्य मन्त्रिणः।**
**ते[१७] मे क्का(क्वा)[१८]द्येति पृष्ट्वा तद्वाचा[१९] वंशां गतो दृशम्॥१०॥[१०]**

---

१ =स्वयम्प्रभाचरी।
२ =बभूवुः।
३ =वज्रजङ्घनृपस्य।
४ =बभूव।
५ =अभूताम्।
६ =सन्तौ।
७ =उत्तमभोगभूमावुत्पन्नौ।
८ =शूकर(रः)।
९ =वानर(रः)।
१० =तयोर्मुनियुगलयोरिष्टिर्दानपूजा, ततः ऋषिदानानुमोदनात्।
११ =अप्रत्याख्यान(नः)।
१२ =दानकाले।
१३ = जम्बूद्वीपोत्तरकुरौ।
१४ =श्रीधरः।
१५ =प्रीतिङ्करमहामुनिम्।
१६ =किं कृत्वा पूर्वं वंशां द्वितीयनरकं शतमतिमन्त्रिचरसम्बोधनार्थं गतः।
१७ =महाबलसम्बन्धिनः पूर्वोक्ताः।
१८ =कुत्र वर्तन्ते।
१९ =प्रीतिङ्करगुरुवचनेन।

नीत्वा शतमतिं चक्रि[१]तुग्भूयोपयमो[२]द्यत(तः)।
तपो नीत्वा ब्रह्मशक्रीकृतमेत्याहतानतम्[३]॥११॥[११]

यौ महामतिसम्भिन्नमती मिथ्यात्वदार्ढ्यतः।
तौ निगोदास्पदं यातौ तेनो[४]क्तः सोऽन्वकम्पत॥१२॥[१२]

महावत्से सुसीमेशः स भूत्वा सुविधिः सुते[५]।
केशवे श्रीमतीजीवे स्नेहादार्यव्रतं गृहे॥१३॥[१३]

भक्त्वा जातोऽच्युतेन्द्रोऽस्य तुक् प्रतीन्द्रो[६] महाव्रतैः।
व्याघ्राद्यार्याऽमरा राजपुत्राः सामानिका[७]श्च तैः॥१४॥[१४]

अथे[८]न्द्रः[९] पुष्कलावत्यां वज्रनाभिः स चक्र्यभूत्।
सामानिका[१०]स्तदनुजाः प्रतीन्द्र[११]स्तद्गृहे[१२]ड्वणिक्[१३]॥१५॥[१५]

चत्वारो वज्रजङ्घस्य येऽस्य मन्त्र्यादयो[१४]ऽनुजाः।
तथा सत्तपसा प्राप्तादधोग्रैवेयकाच्युताः॥१६॥[१६]

ते दशापि श्रियं भुक्त्वा चिरं श्रीवज्रसेनतः।
तीर्थकर्तुस्तपः सम्यक्तेपिरे तेषु[१५] चादिमः[१६]॥१७॥[१७]

---

१ =पुष्करार्धे पूर्वमन्दरे मङ्गलावत्यां रत्नसञ्चये महीधराख्य चक्रिणः पुत्रो जयसेनाख्यो भूत्वा।

२ =विवाहकरण(णम्)।

३ =प्रणतं मन्त्रिचरं प्रति एत्य आगत्य।

४ =गुरुणा।

५ =पुत्रे स्नेहकारणात्।

६ =जातः।

७ जाताः पञ्चाप्येते नैर्ग्रन्थ्यदीक्षां प्रतिपन्नाः। केशवेन सह पञ्च।

८ अथानन्तरम्।

९ सुविधिचरः।

१० तस्य चक्रिणो विजयवैजयन्तजयन्तापराजितसञ्ज्ञाः।

११ केशवचरः।

१२ तस्य भाण्डागारिकः।

१३ धनदेवाख्यः।

१४ =मतिवरचरः सुबाहुः धनमित्रचरो महापीठः। आनन्दचरो महाबाहुः अकम्पनचरः पीठः।

१५ =दशसु मध्ये।

१६ =प्रथमो यश्चक्री।

दृग्विशुद्ध्यादितस्तीर्थकृत्त्वं बद्ध्वाद्यशुक्लभाक्।
सर्वार्थसिद्धौ जातोऽमा सतीर्थ्यैः[१] सो[२]ऽत्र नाभितुक्[३]॥१८॥[१८]

मनुः[४] पञ्चदशो राज[५]राजस्त्रिखेन्द्वपत्यसूः[६]।
इक्ष्वाकु[७]र्वृषभो[८]ऽस्तश्रीर्नटन्नीलाञ्जसात्ययात्॥१९॥[१९]

श्रेयोऽब्दलब्धेक्षुरसपारितो[९]ऽब्दसहस्रतः।
लब्धकेवल एवाद्यतीर्थकृद्भूय निर्वृतः॥२०॥[२०]॥चतुष्कलम्॥

जयवर्ममहाबलललिताङ्गामरवज्रजङ्घकुरुनृतयाव्यात्।
श्रीधरसुविधिनृपाच्युतप्रवज्रनाभ्यन्त्यसुरतया च पुर(रु)
र्नः[१०]॥२१॥[११][२१]

धनश्रीरथनिर्नाम्नी ततो देवी स्वयम्प्रभा।
श्रीमत्यथ कुरुस्त्रीतस्ततो देवः स्वयम्प्रभः॥२२॥[२२]

केशवश्च प्रतीन्द्रश्च धनदत्तो धनाधिपः।
ततोऽन्त्यदेवः स श्रेयान्नन्द्याद्दानादितीर्थकृत्॥२३॥[२३]

राजातिगृध्रो घार्मो[१२]ऽद्रौ व्याघ्रो देवो दिवाकरः।
मन्त्री मतिवरोऽधोऽहमिन्द्रो योऽभूत्सुबाहुकः॥२४॥[२४]

---

१ =एकगुरुभिः अष्टाभिरनुजैः धनदेवेन च सह।

२ =वज्रनाभिचरः सर्वार्थसिद्धिजः।

३ =साकेते नाभिराजान्मुरुदेव्याम्।

४ =लोकव्यवहारोपदेष्टा देशसंयमधरश्च।

५ =सोमप्रभ कच्छादीनां राजा।

६ =त्र्युत्तरशतप्रमाणापत्यानि जनितवान्।

७ =प्रजानां क्षुधार्तानामिक्षुभक्षणलक्षणोपदेशकरणाल्लब्धेक्ष्वाकुसञ्ज्ञः।

८ =त्यक्त(क्तः)।

९ =श्रेयसः युवराजात् अब्दलब्धेन संवस्तरानशनेनाप्राप्तेक्षुरसेन पारितः कृतपारणकः। एतेन च – माद्या अपि तीर्थङ्कराः कृतोपवासाः राज्ञां गृहे पारणां कृतवन्त इति सूचितं प्रतिपत्तव्यम्।

१० =अस्मान् पुरुर्जीर्णः आदिगुरुरव्यात्।

११ मात्रासमकछन्दः। मात्रासमकं नवमो ल्गन्तः। पत्र ७९ वृत्तरत्नाकरम्।

१२ =घर्मायां भवो घार्मः नारकः।

**विराट्[१] सर्वार्थसिद्धिश्च स जीयाद् भरतः पुरोः।**
**आद्यः पुत्रोऽथ चक्रभृत्षोडशो हि मनुर्महान्॥२५॥[२५]**

**यो मन्त्री वत्सकावत्यां प्रीतिवर्धनभूपतेः।**
**प्रभाकरी पुरी[२]होदक्कुरु ना[३] कनकप्रभः[४]॥२६॥[२६]**

**आनन्दोऽधोऽहमिन्द्रोऽभून्महाबाहुरनुत्तरे।**
**सुरश्चान्त्ये[५] स पुरुतुक्कामो बाहुबलीज्यताम्[६]॥२७॥[२७]**

**प्रीतिवर्धनसेनानीर्योऽभूदार्य उदक्कुरौ।**
**प्रभाकरः प्रभा[७]धीशः सेनापतिरकम्पनः॥२८॥[२८]**

**अधोग्रैवेयकामर्त्यः पीठः सर्वार्थसिद्धिजः।**
**जीयाद्वृषभसेनोऽग्रगणी स भरतानुजः॥२९॥[२९]**

**पुरोहितः प्रभाकर्या भर्तुः[८] प्राग्भोगभूमिजः।**
**प्रभञ्जनो रुषितराड्[९] धनमित्रो वणिक्पतिः॥३०॥[३०]**

**अहमिन्द्रो महापीठश्चरमानुत्तरामरः[१०]।**
**योऽभूद्यशोमतौ[११] जातः सोऽनन्तविजयः पुरोः॥३१॥[३१]**

**यो वैश्य उग्रसेनाख्यो व्याघ्रोऽत्रोदक्कुरूद्भवः।**
**चित्राङ्गदः सुरो जज्ञे वरदत्तो नृपात्मजः॥३२॥[३२]**

---

१ =विशिष्टराजा वज्रसेनतीर्थकरपुत्रः।
२ =नगर्याम्।
३ =भूमौ। ना पुमान्।
४ =काञ्चनविमानेशः।
५ =सर्वार्थसिद्धौ।
६ =पूज्यतां शिवार्थिभिः।
७ =विमान(नम्)।
८ =प्रीतिवर्धननृपस्य।
९ =विमानेशः।
१० =सर्वार्थसिद्धौ देवोऽभूत्।
११ =यशस्वत्यां भरतमातरि।

**सामानिकोऽच्युतेन्द्रस्य विजयो वज्रसेनजः।**
**अन्त्योऽहमिन्द्रः सोऽनन्तवीरो वीरः पुरोः सुतः॥३३॥[३३]**

**हरिवाहननार्प[१]त्यः शूकरः कुरुमानवः।**
**मणिकुण्डलिनन्देशो[२] वरसेनो नरेन्द्रतुक्॥३४॥[३४]**

**योऽभूत्सामानिकामर्त्यो वैजयन्तो जिनाङ्गजः[३]।**
**अन्त्यानुत्तरदेवश्च पौरवः[४] सोऽच्युताह्वयः॥३५॥[३५]**

**यो वणिग्नागदत्ताख्यः कपिः पूर्ववदार्यकः।**
**मनोहरा[५]मरो राजपुत्रश्चित्राङ्गदश्रुतिः[६]॥३६॥[३६]**

**जज्ञे सामानिकसुरो जयन्तस्तीर्थ[७]तुक्पुनः।**
**पञ्चमेऽनुत्तरे[८]ऽमर्त्यः स वीरः पुरुनन्दनः॥३७॥[३७]**

**आपूपिको[९] लोलुपाख्यो नकुलो दिव्यमानुषः[१०]।**
**मनोरथः[११] पार्थिवतुक्[१२] प्रशान्तमदनाभिधः॥३८॥[३८]**

**योऽच्युतेन्द्रसमो[१३] देवो जिन[१४]पुत्रोऽपराजितः।**
**स्वरेकचरम[१५]श्चाभूत्सुवीराख्यः स पौरवः॥३९॥[३९]**

---

१ =राजपुत्रः।

२ =नन्दाख्य(ख्यो) विमानस्वामी।

३ =वज्रसेनतीर्थकरस्य पुत्रः।

४ =पुरोरपत्यम्।

५ =नन्द्यावर्तविमानेशः।

६ =नाम राजपुत्रः।

७ =वज्रसेनतीर्थकरस्य।

८ =सर्वार्थसिद्धौ।

९ =कान्दविकः।

१० =उत्तरकुरुनरः।

११ =प्रभाकरविमानेशः।

१२ =नृपस्य।

१३ =सामानिकः।

१४ =वज्रसेनस्य।

१५ =सर्वार्थसिद्धिदेवः।

**संन्यासमृत्युदानानुमोदसद्वृक्तपोऽर्जितैः।\
पुण्यैस्तेऽभ्युदयान् भुक्त्वा सिद्धाः सिद्धिं दिशन्तु नः॥४०॥[४०]**

॥इत्याशाधरदृब्धे त्रिषष्टिस्मृतिनाम्नि महापुराणान्तस्तत्त्वसङ्ग्रहे
श्रीवृषभतीर्थङ्कर-भरतेश्वरादिनिवृत्तपुराणं प्रथमम्॥१॥

**वत्सादेशेषु[१] सीमाप्तः[२] स्वामी विमलवाहनः।
चित्राद्राज्याद्विरज्यात्तत्र[३]तो बध्वा(द्ध्वा)ऽन्त्यनाम[४] शम्॥१॥[४१]**

**निर्विश्य[५] विजये[६] भूत्वा साकेते जैतशात्रवः[७]।
वीक्ष्योल्कां त्यक्तराज्यो[८]ऽव्याकृतः तीर्थोऽत्र नोऽजितः॥२॥[४२]**

**यो वत्सकावती पृथ्वी पुरेशो जयसेनकः।
रतिषेणसुतेऽतीते धृतिषेणेऽर्पितक्षितिः॥३॥[४३]**

**महारुतेन श्यालेन सह कृत्वा[९] तपोऽच्युते।
देवो महाबलः सो[१०]ऽभूदितरो[११] मणिकेतुकः॥४॥[४४]**

**प्राक्च्युतं[१२] बोधयत्वन्य[१३] इति ताभ्यां कृता स्थितिः[१४]।
च्युत्वा महाबल[१५]श्चक्री सगरोऽभूज्जिनान्वये॥५॥[४५]**

---

१ =द्वीपेऽस्मिन्निति वर्तते जम्बूद्वीप पूर्वविदेहस्थे।

२ =सुसीमा आप्ता प्राप्ता येन सः।

३ =स्वयमुत्पन्नबोधि सन्।

४ =तीर्थकरत्वनाम। सर्वेषां तीर्थकृतां तद्बन्धकाले प्रायेणैकादशाङ्गश्रुतज्ञानं बोद्धव्यम्।

५ =भुक्त्वा।

६ =प्रथमानुत्तरविमाने।

७ =जितशत्रोरपत्यं विजयसेनादेव्यामुत्पन्नः।

८ =त्यक्तम् अजितसेनपुत्राय दत्तं राज्य ---- गृहीतसंयमः केवलमुत्पाद्येति तीर्थकरत्वं सद्योपपत्तेर्लभ्यते। अक्षराणि अस्पष्टानि।

९ =यशोधरगुरूपदिष्टम्।

१० =जयसेनः।

११ =महारुतचरः।

१२ =इतः स्वर्गात्प्रथमं कर्मभूमिमवतीर्णम्।

१३ =इहस्थः स्वर्गस्थितः।

१४ =सम्प्रसारणम्।

१५ =जयसेनचरः।

**चतुर्मुखान्ते[१] सख्योक्तो यतीभूय जिनालये।**
**न बुद्धो बोधितो[२] विप्रीभूय माया[३]स्ततुक् शुचिः॥६॥[४६]**

**भगीरथे श्रियं न्यस्य स सिद्धस्तपसा सतुक्[४]।**
**वरदत्त[५]सुतपुत्रराज्यः सोऽप्यर्चितः[६] सुरैः॥७॥[४७]**

॥श्री अजितनाथ-सगर-इतिवृत्तोत्तरं द्वितीयम्॥२॥

**कच्छ[७]क्षेमपुरे योऽभूद्राजा विमलवाहनः।**
**स्वयम्प्रभजिनान्तेऽसौ प्रव्रज्यान्तान्त्यनामकः॥१॥[४८]**

**सुदर्शने विमानेऽभूद्देवो ग्रैवेयकादिमे।**
**ततः स्वा(श्रा?)वस्तिनगरे दृढराजाङ्गजो[८]ऽजनि॥२॥[४९]**

**शम्भवाख्यः स दृष्ट्वाभ्रविभ्रंशं[९] त्यक्तराज्यकः[१०]।**
**प्राप्यार्हन्त्यं धर्मतीर्थं कृत्वा मुक्तोऽस्तु नः श्रिये॥३॥[५०]**

---

१ =चतुर्मुखमुनेः समीपे केवलज्ञानकल्याणकं कर्तुमागतैरिन्द्रैः सहागतेन सख्या मणिकेतुना उक्तः प्रागुक्तस्थितिः। तत्कारितजिनालये तेनैव पुनरुक्तः पुत्रव्यामोहान्नबुद्धः।

२ =बोधितः सख्या विप्रीभूय। ब्राह्मणवेषं धृत्वा।

३ =पितरमभोजनप्रतिज्ञया उपरुध्य गृहीतान्निरवद्यप्रैषाद्भरतेशचैत्यालयरक्षार्थं कैलाशं(सं) परितो दण्डरत्नेन गङ्गाखातिकीकृतवतां मन्त्रिसम्मतेन मणिकेतुना क्रूरोरगीभूय। मायाभस्मीकृतानां तुजां षष्ठिसहस्रपुत्राणां शुचि शोके सति तच्छोकाविष्टः सन्नित्यर्थः।

४ =पुत्रैः सह।

५ =भगीरथस्य पुत्रो वरदत्तः वरदत्तस्य कोऽपि पुत्रस्तस्मै भगीरथेन राज्यं दत्तं पुत्रे राज्यं यस्य यस्माद्दासः। भगीरथः।

६ =तत्पुत्रः सगरपुत्रः सम्मेदे सगरस्य मुक्तिं श्रुत्वा प्रव्रज्य गङ्गातटे कायोत्सर्गेण स्थितः शक्रेण क्षीरोदजलक्षालितांह्रिः चिरं तपः कृत्वा सिद्धः तत्क्रमाम्बुजप्रवाहसङ्गमात्तदा प्रभृति गङ्गापि लोके तीर्थमभूत्। एतदर्चितः सुरैरित्यतो लभ्यते।

७ = जम्बूद्वीपस्य प्राग्विदेहस्थः देशः।

८ =सुषेणा गर्भे।

९ =विनाशम्।

१० =पूर्ववत्प्रवज्येति सामर्थ्याल्लभ्यते।

॥श्रीशम्भवजिनस्य तृतीयम्॥३॥

**यो मङ्गलावती[१] रत्नसञ्चयेशो महाबलः।**
**निर्विण्णः संयमं प्राप्य गुरोर्विमलवाहनात्॥१॥[५१]**

**एकादशाङ्गभृद्बद्धतीर्थकृत्वोऽहमिन्द्रताम्।**
**विजये प्राप्य साकेते स्वयंवरसुतो[२]ऽभवत्॥२॥[५२]**

**गन्धर्वनगरभ्रंशाद्विरज्यात्मजदत्तभूः।**
**तीर्थं प्रवर्त्य मुक्तश्च स नन्द्यादभिनन्दनः॥३॥[५३]**

॥श्रीअभिनन्दनार्हतश्चतुर्थम्॥४॥

**त्राता प्राग्धा[३]तकीखण्डमेरोः प्राक्पुष्कलावती[४]।**
**श्रितायाः पुण्डरीकिण्या[५] रतिषेणो विरज्य यः॥१॥[५४]**

**जिनार्हन्नन्दनाभ्यर्णे विदितैकादशाङ्गकः।**
**बद्धतीर्थकरत्वोऽगाद्वैजयन्ते[६]ऽहमिन्द्रताम्॥२॥[५५]**

**पुत्रो[७] मेघरथायोध्यापतेर्भूत्वात्र राज्यतः।**
**स्वयं विरज्य चार्हन्त्यं प्राप्तस्तं सुमतिं स्तुमः॥३॥[५६]**

॥श्रीसुमतिजिनस्य पञ्चमम्॥५॥

**पूर्वद्वीपे[८] सुसीमेशो वत्सायां योऽपराजितः।**
**प्रव्रज्यैकादशाङ्गानि ज्ञात्वार्हत्पिहितास्रवात्॥१॥[५७]**

---

१ =प्राग्विदेहस्थो देशः।

२ =सिद्धार्थागर्भे।

३ प्राग्=पूर्व।

४ =पूर्वविदेह(हः)।

५ =त्राता।

६ =द्वितीयामुत्तरे।

७ =मङ्गलागर्भजः।

८ =प्राग्धातकीखण्डे।

बद्धान्त्यनामा देवोऽभूत्प्रीतिङ्करविमानजः।
ऊर्ध्वग्रैवेयके भर्तुः कौशाम्ब्या धरणस्य तुक्[१]॥२॥[५८]

भूत्वात्र वारिबन्धस्थं गजं श्रुत्वात्तसंयमः।
तीर्थं कृत्वा च निर्वाणः पातु पद्मप्रभः स नः॥३॥[५९]

॥श्रीपद्मप्रभस्वामिनः षष्ठम्॥६॥

धातकीखण्डपूर्वार्धे सुकच्छाक्षेमपूःपतिः।
नन्दिषेणोऽस्तसङ्गोऽर्हन्नन्दनाद्बद्धतीर्थकृत्॥१॥[६०]

प्राक्श्रुतज्ञः[२] सुभद्राख्येयो ग्रैवेयकमध्यमे।
मध्यमेऽभूद्विमानेऽथ सुप्रतिष्ठनृपात्मजः[३]॥२॥[६१]

काश्यामृतुपरावर्तान्निर्विद्यासाद्य केवलम्।
प्रवर्त्य तीर्थं मुक्तोऽभूत्स सुपार्श्वोऽस्तु नः श्रियै॥३॥[६२]

॥श्रीसुपार्श्वजिनस्य सप्तमम्॥७॥

प्राक्पुष्करार्धे पाश्चात्ये विदेहे[४] श्रीपुरे नृपः।
सुगन्धिदेशे श्रीषेणः श्रीकान्ताजनि तत्प्रिया[५]॥१॥[६३]

स्वयं सुताप्तुं निःपुत्रशोको वाचा पुरोधसः।
जिनार्चाः सन्मणिस्वर्णैर्विधाप्याष्टाह्निकार्चनम्॥२॥[६४]

कृत्वा सप्रेयसि[६]र्भक्त्या सस्नौ[७] तद्गन्धवार्घटैः।
ततो दर्शितसुस्वप्नः श्रीवर्मासीत्तयोः सुतः॥३॥[६५]

१ =पुत्रः सुषी(सी)मागर्भजः।

२ =एकादशाङ्गवित्।

३ =पृथिवीषेणागर्भजः।

४ =पश्चिमविदेहे।

५ =श्रीषेणस्य भार्या।

६ =भार्यासहितः।

७ =स्नानञ्चकार।

**पित्राभिषिक्तोऽसौ राज्यं कुर्वन्निष्ट्वार्हतो निशि।**
**उपोषितोऽग्र[१]सौधस्थो वीक्ष्योल्कापातमापिवान्[२]॥४॥[६६]**

**निर्वेदं तपसा जज्ञे सौधर्मे श्रीधरस्ततः।**
**धातकीखण्डपूर्वार्धेऽलकानीवृतिनामनि[३]॥५॥[६७]**

**अयोध्यायां चक्रवर्ती योऽभूदजितसेनकः।**
**ततोऽच्युते स तपसा ततस्तद्द्वीपपूर्वतः[४]॥६॥[६८]**

**विजये[५] मङ्गलावत्यां नगरे रत्नसञ्चये।**
**पद्मनाभो महाराजो जनित्वा श्रीधरान्तिके॥७॥[६९]**

**दीक्षित्वा नाम बध्वा(द्ध्वा)न्त्यं वैजयन्तेऽभवत्ततः।**
**चन्द्रपुर्यां महासेननृपस्यावाप्य पुत्रताम्[६]॥८॥[७०]**

**दर्पणे वक्त्रविकृतिं दृष्ट्वा मुक्त्वा श्रियं जिनः[७]।**
**जनेशामभवत्तीर्थं[८] स नश्चन्द्रप्रभोऽवतात्॥९॥[७१]**

**श्रीवर्मा श्रीधरो देवोऽजितसेनोऽच्युताधिपः।**
**पद्मनाभोऽहमिन्द्रोऽभूद्योऽव्याच्चन्द्रप्रभः स नः[९]॥१०॥[७२]**

॥श्रीचन्द्रप्रभस्याष्टमम्॥८॥

**पुष्करार्धस्य पूर्वार्धे पुष्कलावत्यलङ्कृते[१०]।**
**ईशिता पुण्डरीकिण्या महापद्मो जिनाधिपात्[११]॥१॥[७३]**

---

१ =श्रेष्ठ(ष्ठः)।

२ =प्राप्तः निर्वेदम्।

३ =देशे।

४ =स चासौ द्वीपः तद्द्वीपः जम्बूद्वीपपूर्वविदेह(हः)।

५ =क्षेत्रे।

६ =लक्ष्मणागर्भे।

७ =जीवन्मुक्तः।

८ =इन्द्रधरणेन्द्रचक्रेशां तीर्थमभवत्।

९ =अस्मान् रक्षतु।

१० =पुण्डरीकिण्याः।

११ =भूतहितनाम्नः।

**श्रुत्वा भूतहिताल्लब्ध्वा तपः स्वं[१] तीर्थकृत्त्वभाक्।**
**यः प्राणतेन्द्रः सुग्रीवकाकन्दीशस्य[२] सोऽत्र तुक्॥२॥[७४]**

**उल्कापातात्त्यक्तराज्यस्तपसा प्राप्तकेवलः।**
**धर्मतीर्थं व्यधात्तस्मै पुष्पदन्तार्हते नमः॥३॥[७५]**

॥श्रीपुष्पदन्तार्हतो नवमम्॥९॥

**द्वीपे तत्रैव[३] वत्सायां यः सुसीमापुरीपतिः।**
**पद्मगुल्मो वसन्तश्रीकान्तामृत्योः[४] सुचातुरः॥१॥[७६]**

**स नन्दसूरेः स्वीकृत्य तपस्तीर्थकरत्वयुक्[५]।**
**भूत्वा रणेन्द्रो मलये राजभद्रपुरप्रभोः[६]॥२॥[७७]**

**सुतो[७] दृढरथस्यायं हिमानी[८]विलयात्तपः।**
**श्रित्वा तीर्थं प्रवर्त्यागाच्छिवं जीयात्स शीतलः॥३॥[७८]**

**कन्याभूगोऽश्वदासीभरथहेमतिलौकसाम्[९]।**
**दानं तेनेऽस्य[१०] तीर्थां ते मुण्डशालायनो द्विजः॥४॥[७९]**

॥श्रीशीतलनाथस्य दशमम्॥१०॥

**प्राचि द्वीपे सुकच्छाख्ये देशे क्षेमपुरे नृपः।**
**नलिनप्रभ इत्यासीत्सोऽनन्तजिनतस्तपः॥१॥[८०]**

---

१ =आध्यात्मिकम्।

२ =सुग्रीवनाम्नः काकन्दीपुरीपतेः तुक् पुत्रः जयरामागर्भे।

३ =पुष्करार्धे।

४ =मरणात्।

५ =युक्तं तपः।

६ =दृढरथनृपस्य।

७ =नन्दागर्भजः।

८ =हिमानां संहतिः-सं.।

९ =गृहं ब्रह्मपुरी।

१० =शीतलस्य।

स्वीकृत्य तीर्थकृन्नाम बध्वा(द्ध्वा)गादच्युतेन्द्रताम्।
पुष्पोत्तरविमानेऽतः पुत्रः[१] सिंहपुरेशितुः॥२॥[८१]
विष्णोर्भूत्वात्र मुक्तश्रीर्व[२]सन्तपरिवर्तनात्।
धर्मं प्रणीय[३] निर्वाणः स श्रेयान् श्रेयसेऽस्तु नः॥३॥[८२]
पातो[४] राजगृहं दत्तं भ्रात्रीयो विश्वभूतिना।
विशाख[५]भूतेर्यवीयान्[६] विश्वनन्दी तदात्मजम्[७]॥४॥[८३]
विशाखनन्दिनं स्वात्तवनं[८] भङ्क्त्वा[९]नुगृह्यतम्।
स पितृव्यस्तपः कुर्वन्[१०] मासक्षपणपारणे॥५॥[८४]
प्रविष्टो मथुरान् धेन्वा पातितः क्व स विक्रमः।
इति तेनो[११]पहसितो वेश्यासौधाग्रवर्तिना॥६॥[८५]
क्रोधान्निदानं तद्घाते कृत्वाप सपितृव्यकः।
महाशुक्रं ततश्च्युत्वा पोदनेशः प्रजापतेः॥७॥[८६]
पुत्रः पितृव्यो[१२] विजयो बलोऽभूदितरो[१३] हरिः।
त्रिपृष्ठो जितसिंहौ तौ भवे भ्रान्त्वा पुरा रिपुम्[१४]॥८॥[८७]

---

१ =नन्दागर्भजः।

२ =त्यक्तराज्यलक्ष्मीकः।

३ =तीर्थं कृत्वा।

४ =रक्षां कुर्वतः।

५ =विश्वभूतेरनुजस्य।

६ =युवराजो जातः।

७ =विशाखभूतिपुत्रम्।

८ =स्वेभ्यो वनपालेभ्य आत्तं बलाद्गृहीतं वनं येन। स्वपित्रा विश्वनन्दिनं कामभूपराजमपराध्यं तं निर्जेतुं प्रस्थाप्य वनपालानभिभूय गृहीतनन्दनोपमं तन्नन्दनवनम्।

९ =सङ्ग्रामे तदाश्रयमुत्पाटितकपित्थवृक्षान्नाशयित्वा। अनुगृह्यतं नश्यन्तं शिलास्तम्भमाश्रित्य स्थितं तलप्रहारेण तं पातयित्वा विषीदन्तं मा भैषीरिति समाश्वास्य राज्यं तद्वनं च दत्वा। प्रव्रज्यां गृहीत्वा।

१० =पुत्राय राज्यं दत्वा प्रव्रजितेन पितृव्येण सह सम्भूतगुरुसन्निधौ तपस्यन्।

११ =दुराचारत्वादमात्यादिभी राज्यान्निर्धाटितेन जनस्य विगतेशो भूय तत्रागतेन।

१२ =विशाखभूतिचरः।

१३ =विश्वनन्दिचरः।

१४ =विशाखनन्दिनम्।

**तं जातमलकाधीशमश्वग्रीवार्धचक्रिणम्।**
**हत्वा स्वयम्प्रभाहेतोस्त्रिखण्डां भरतावनिम्॥९॥[८८]**

**भुक्त्वागात्सप्तमीं[१] सारि[२]र्बह्वारम्भपरिग्रहः।**
**त्रिपृष्ठो भूमिमस्तारिर्विजयः पुनरष्टमीम्[३]॥१०॥[८९]**

॥श्रीश्रेयस्तीर्थकराश्वग्रीवप्रतिवासुदेव-विजयबलदेव-
त्रिपृष्ठवासुदेवेतिवृत्तोत्तरमेकादशम्॥११॥

**प्राग्द्वीपे[४] वत्सकावत्यां यो रत्नपुरपालकः।**
**पद्मोत्तरोऽभूत् श्रमणो युगन्धरजिनाश्रयात्॥१॥[९०]**

**प्राप्तान्त्यनामा शक्रो[५]ऽथ महाशुक्रेऽथ नन्दनः[६]।**
**वसुपूज्यस्य देशेऽङ्गे चम्पायां सारसंयमम्[७]॥२॥[९१]**

**कुमार एव संसारतत्त्वाध्यानादुपेत्य[८] च।**
**निर्ववौ[९] तीर्थकृद्देयात्सश्रियं वासुपूज्यताम्[१०]॥३॥[९२]**

**विन्ध्यशक्तिनृपो विन्ध्यपुरेऽभूदत्र भारते।**
**सुषेणस्याथ कनकपुरेशो गुणमञ्जरीम्॥४॥[९३]**

**नर्तकीरत्नमाकर्ण्य चराद् दूतेन याचिताम्।**
**अददानमवस्कन्द्य[११] तं[१२] जित्वाजौ तदग्रहीत्॥५॥[९४]**

---

१ =महातमःप्रभां नरकभुवम्।
२ =अश्वग्रीवसहितः।
३ =मुक्तिलक्षणां भूमिमगात्।
४ =पुष्करार्धपूर्वशैलप्राग्विदेहे।
५ =अभूत्।
६ =जयावतीगर्भजः।
७ =यथाख्यातचारित्रं प्राप्त निर्ववौ।
८ =प्राप्य।
९ =मुक्तोऽभूत्।
१० =वासुपूज्यस्य भावः वासुपूज्यता। तां वासुपूज्यसम्बन्धिनीम्।
११ =धाटयित्वा।
१२ =तं सुषेणम्।

**तन्मानभङ्गान्निर्विद्य सुषेणः सुव्रताज्जिनात्।**
**महापुरेशिना[१] वायुरथेनामाचरत्तपः॥६॥[९५]**

**विमानेऽनुत्तरे वायुरथोऽभूत्प्राणते[२] प्रभुः।**
**निदानिको[३]ऽन्यो[४]ऽनुपमे देवो द्वारावतीपतेः[५]॥७॥[९६]**

**तुग्ब्रह्मणोऽचलाख्योऽभूत्पूर्वो[६] रामः परो[७] हरिः।**
**द्विपृष्टा(ष्ठा)ख्यो भवे भ्रान्त्वा भोगवर्धनपूःपतिम्॥८॥[९७]**

**तारकाख्यं[८] प्रतिहरीभूतं गन्धेभयाचिनम्।**
**हत्वारिं सो[९]ऽवधिस्थानं[१०] तेना[११]मागाद्बलः शिवम्॥९॥[९८]**

॥इत्याशाधरदृब्धे त्रिषष्टिस्मृतिनाम्नि महापुराणान्तस्तत्त्वसङ्ग्रहे श्रीवासुपूज्य-तारकप्रतिकेशवाचलाख्यबल-द्विपृष्ठाख्यकेशवेतिवृत्तोत्तरं पुराणं द्वादशम्॥१२॥

**प्रतीच्य[१२]धातकीखण्डे मेरुप्रत्यग्विदेहगे।**
**विषये रम्यकावत्यां यो महानगरेऽधिराट्॥१॥[९९]**

**पद्मसेनस्तपः सर्वगुप्तकेवलिसन्निधौ।**
**गृहीत्वैकादशाङ्गज्ञस्तीर्थकृन्नाम बद्धवान्॥२॥[१००]**

---

१ =महापुराख्यपुरस्वामिना।
२ =स्वर्गे।
३ =विन्ध्यशक्तिघाते कृतनिदानः सुषेणः प्राणतस्वर्गेऽनुपमे विमाने।
४ =वायुरथचरः।
५ =ब्राह्मणस्तुक् पुत्रः।
६ =वायुरथचरः।
७ =सुषेणचरः।
८ =विन्ध्यशक्तिचरम्।
९ =द्विपृष्टः(ष्ठः)।
१० =सप्तमं नरकम्।
११ =रिपुणा सह।
१२ =पश्चिम।

**सहस्रारेऽथ शक्रोऽभूत्ततः काम्पिल्यपत्तने।**
**कृतवर्मनृपस्याभूत्सुतो[१] हैमन्तसम्पदाम्॥३॥[१०१]**

**विलीनां वीक्ष्य निर्ग्रन्थीभूय ध्यानाप्तकेवलः।**
**धर्मं प्रणीय सिद्धस्तं स्तुवे विमलवाहनम्॥४॥[१०२]**

**योऽत्रापरविदेहेऽभूच्छ्रीपुरे नन्दिमित्रराट्।**
**स सुव्रतमुनेः प्राप्तव्रतोऽन्त्यानुत्तरं गतः॥५॥[१०३]**

**भरतेऽस्मिन् कुणालाख्ये देशे स्वा(श्रा?)वस्त्यधीश्वरः।**
**सुकेतुर्भोगशक्तोऽभून्निषिद्धोऽप्यसकृद्धितैः[२]॥६॥[१०४]**

**द्यूतं दीव्यन् स बल्याख्य हारिताशेष[३]वस्तुकः।**
**सुदर्शनाचार्यवाचा तपः[४] स्यां तपसामुना॥७॥[१०५]**

**स बलाद्युद्ध[५] इत्यात्तनिदानो लान्तवं(कं?) गतः।**
**ताव[६]भूतां सुतौ भद्रनाम्नो द्वारवतीपतेः॥८॥[१०६]**

**धर्मस्वयम्भूनामानौ रामविष्णू अथैकदा।**
**मधुर्बलिचरः[७] सोऽर्धचक्री वरपुरेशिना॥९॥[१०७]**

**केनापि प्रहितं राजा प्राभृतं दूतघाततः[८]।**
**स्वयम्भुवा हृतं श्रुत्वा नारदात्तज्जिघांसया[९]॥१०॥[१०८]**

---

१ =जयश्यामागर्भजः।

२ =मन्त्रिबन्धुवरैः।

३ =राष्ट्रवित्तबलदेवीप्रभृति।

४ =भवेयमहं दीक्षां ग्रहीष्यामि चेन्मम दायो न पतिष्यति।

५ =बलाख्यः बलात्कारेण युद्धः पश्चात्सुकेतुना दीक्षा गृहीता।

६ =नन्दिमित्रसुकेतू द्वौ।

७ =जातः।

८ =द्वयोर्दूतौ निहत्य।

९ =तयोर्धर्मस्वयम्भुवोर्हन्तुमिच्छया।

**मुक्तचक्रो[१] हतस्तेन[२] सप्तमीं भुवमाविशन्।**
**पश्चात्स्वयम्भू[३]श्चाधर्मादूर्ध्वं धर्मः सुनिर्वृतः[४]॥११॥[१०९]**

**मधुरारामदत्तादिभवी[५] मेरुश्च[६] मन्दरः।**
**वारुणीपूर्णचन्द्रादिभवी विमलसङ्घपौ[७]॥१२॥[११०]**

**जातौ सूच्येत तद्वृत्तं[८] भरते[९]ऽत्र खगाद्र्य[१०]पाक्[११]।**
**आनीय गन्धमालिन्या नदीपञ्चकसङ्गमे॥१३॥[१११]**

**क्षिप्त्वा प्राग्वैरतो[१२] विद्युद्दण्डखेटेन[१३] मारितः।**
**खेटैस्तदीडित[१४]श्चान्यैः सञ्जयन्तः[१५] सुधीर्मुनिः॥१४॥[११२]**

**तत्कल्याणेऽहिराड्भूतो[१६] निदानादागतोऽनुजः[१७]।**
**तस्याङ्गं वीक्ष्य रुष्टोऽरिं सबन्धुं हन्तुमु[१८]द्यतः॥१५॥[११३]**

---

१ =मधुः।
२ =स्वयम्भुवा।
३ =सप्तमीमाविशत्।
४ =मोक्षङ्गतः।
५ =मेरुभवः। रामदत्तादि भवो यस्य मेरोः सः।
६ =पुनः।
७ =श्रीविमलनाथगणधरौ जातौ।
८ =तयोर्मेरुमन्दरयोः।
९ =जम्बूद्वीपापरविदेहस्थ विजयार्ध(र्धे?)।
१० =किं कृत्वा पूर्वं मारितः।
११ =दक्षिणतः सकाशादानीयः अपाक् शब्दोऽत्राव्ययः।
१२ =श्रीभूतिभवे सिंहपुरे सिंहसेनराजेन बद्धात्।
१३ =श्रीभूतिचरेण।
१४ =स चासौ ईडितस्तदीडितः।
१५ =सिंहसेनराजचरः।
१६ =धरणेन्द्रत्वं प्राप्तः।
१७ =जयन्तनामा।
१८ =नागपाशेन बद्ध्वा समुद्रे क्षेप्तुम्।

**आदित्याभसुरेणो[१]क्त्वा सत्यघोषादिवृत्तकम्।**
**वारितो[२] मन्दराख्योऽभूद्गणी मेरुश्च स[३] क्रमात्॥१६॥[११४]**

॥श्रीविमलनाथ-धर्म-स्वयम्भूमधुवृत्तगर्भं
सञ्जयन्त-मेरु-मन्दरचरितोत्तरं त्रयोदशम्॥१३॥

**राजा प्राग्धातकीखण्डकच्छकावत्यवस्थितः।**
**पुरे पद्मरथोऽरिष्टे यः श्रित्वार्हत्स्वयम्प्रभात्॥१॥[११५]**

**तपो[४] बध्वा(द्ध्वा) तीर्थकृत्त्वं भुक्त्वाच्युतरमां[५] च्युतः।**
**साकेते सिंहसेनस्य पुत्रीभूय[६] विरज्य च॥२॥[११६]**

**उल्कापाते क्षणाज्जातकैवल्यस्तीर्थकृत्सताम्[७]।**
**प्राग्योऽनन्तं पदं प्राप्यात्मनः पायादनन्तजित्॥३॥[११७]**

**वसुषेणः पौदनेऽस्मिन्नृपो नन्दा[८]स्य वल्लभा।**
**तां[९] वीक्ष्य मलयाधीशस्तन्मि[१०]त्रं चण्डशासनः॥४॥[११८]**

**कामार्तोऽहृत[११]तद्भर्ता[१२] शोकार्तः सन् प्रबोधितः[१३]।**
**श्रेयोगणं नुत्य[१४] कृत्वा सिंहनिष्क्रीडितं तपः॥५॥[११९]**

---

१ =रामदत्ताचरेण।
२ =निषिद्धः।
३ =आदित्याभसुरः मेरुरभूत्। चकाराज्जयन्तो मन्दरोऽभूत्।
४ =श्रित्वा आश्रित्य।
५ =षोडशस्वर्गजां लक्ष्मीम्।
६ =जयश्यामायाम्।
७ =सत्पुरुषाणां मध्ये प्राग्जेष्ठः।
८ =वसुषेणस्य भार्या नन्दा।
९ =नन्दान्।
१० =तस्य वसुषेणस्य।
११ =सुषेणः।
१२ =वसुषेणस्य भार्या नन्दा।
१३ =प्रबोधो जातो यस्य स प्रबोधितः।
१४ =नुत्वा।

**ततो निदानतो[१]ऽगच्छत्सहस्रारं परस्थितिः[२]।**
**प्राग्विदेहे[३] नन्दनेऽभूत्पुरे राजा महाबलः॥६॥[१२०]**
**सो[४]ऽपि तद्वत्त[५]पः कृत्वा प्रजापालार्हदन्तिके।**
**शान्त[६]स्तत्रैव[७] देवोऽभूत्ततश्च्युत्वाभवत्सुतः॥७॥[१२१]**
**द्वारावत्या[८]मभूत्सोमप्रभभूपस्य सुप्रभः।**
**वसुषेणचरोऽस्या[९]सीदनुजः पुरुषोत्तमः॥८॥[१२२]**
**तच्छ्रि[१०]यं नारदाच्छ्रुत्वा काशीशो मधुसूदनः[११]।**
**तौ चण्डशासन[१२]भरौ[१३] तेनैवेभादिकं[१४] करम्[१५]॥९॥[१२३]**
**प्रातिलोम्यं[१६] तयोः श्रुत्वा क्रुद्धस्तौ हन्तुमागतः।**
**स हतो विष्णुना सारिः क्ष्मां गतोऽन्त्यां बलः शिवम्॥१०॥[१२४]**

॥श्रीअनन्तनाथ-सुप्रभ-पुरुषोत्तम-मधुसूदनेतिवृत्तोत्तरं चतुर्दशम्॥१४॥

**यः सुसीमापुरे पूर्वधातकीखण्डवत्सगे।**
**नृपो दशरथस्तावदि[१७]न्दुग्रहणदर्शनात्॥१॥[१२५]**

---

१ =भवान्तरेऽलङ्घ्यशासनः कान्तोभूयाम् इति सङ्कल्पः।
२ =परा उत्कृष्टा स्थितिः। अष्टादशसमुद्रायुः।
३ =जम्बूद्वीपस्थे।
४ =महाबलः।
५ =वसुषेणवत्।
६ =शान्तनामा।
७ =सहस्रारे।
८ =द्वारावती द्वारवती च स्यात्।
९ =सुप्रभस्य।
१० =तस्य पुरुषोत्तमस्य।
११ =चण्डशासनचरः।
१२ =प्रचण्डाज्ञातत्परौ।
१३ =धृतवन्तौ नारदात् श्रुत्वा।
१४ =नारदेनैव गजरत्नादिकं करं प्रार्थ्यम्।
१५ =राजदेयं दानम्।
१६ =शत्रुत्वम्।
१७ =पश्चात्।

दीक्षितस्तीर्थकृत्पुण्यं बध्वा(द्ध्वा) सर्वार्थसिद्धिशम्[१]।
भुक्त्वा भानुमहाराजतोको[२] रत्नपुरेऽजनि॥२॥[१२६]

वीक्ष्योल्कां यानमारूढः संयमारूढकेवलः।
प्ररूढधर्म[३]तीर्थोऽसौ धर्मो धर्मं तनोतु नः॥३॥[१२७]

मेरोः प्रत्यगि[४]ह द्वीपे वीतशोकापुरीपतिः।
नरादिवृषभस्तप्त्वा तपो दमवरान्तिके॥४॥[१२८]

सहस्रारं समापास्मिंस्तथा राजगृहे नृपः।
सुमित्रो मल्लतादृप्तो राजसिंहेन भूभुजा॥५॥[१२९]

निर्जितो दोर्युधा कृष्णाचार्यान्ते दुश्चरं[५] तपः।
कृत्वा मृतो निदानेन माहेन्द्रेऽभून्महर्द्धिकः॥६॥[१३०]

आद्यो[६]ऽथ सिंहसेनस्य सूनुः खगपुरेशिनः।
सीरी सुदर्शनोऽन्यो[७]ऽभूद्विष्णुः पुरुषसिंहकः॥७॥[१३१]

राजसिंहचरो भ्रान्त्वा ततो[८] हास्तिनपूःपतिः।
मधुक्रीडाभिधो जज्ञे याचमानस्त[९]तः[१०] करम्॥८॥[१३२]

केशवेन हतोऽगच्छदवधिस्थानमन्वरि[११]।
धर्मतीर्थकराल्लब्धबोधिः सिद्धिमगाद्बलः॥९॥[१३३]

---

१ =सिद्धेः शं सुखम्।

२ =पुत्रः सुप्रभागर्भे।

३ =प्ररूढं प्रसिद्धं धर्मतीर्थं यस्य सः।

४ =पश्चिमे।

५ =सिंहनिःक्री(ष्क्री)डितादिकम्।

६ =नरवृषभचरः।

७ =सुमित्रचरः।

८ =तदनन्तरम्।

९ =दण्डगर्भाख्यप्रधानमुखेन कृत्वा।

१० =तस्मात्पुरुषसिंहात्।

११ =पुरुषसिंहेन सह।

**विचित्रपुरराण्म[१]ध्यग्रैवेयकमगात्तपः।**
**तप्त्वा नरपतिर्वासुपूज्यान्ते कोशलापतेः[२]॥१०॥[१३४]**
**मघवा यः सुमित्रस्य पुत्रो भूत्वा स चक्रिताम्।**
**भुक्त्वापाभयघोषाख्यकेवल्यन्ते परं पदम्॥११॥[१३५]**
**अथाच्युतादेत्य सूर्यवंशजोऽनन्तवीर्यजः।**
**चक्री सनत्कुमारोऽभूत्साकेतेऽत्यन्तरूपवान्॥१२॥[१३६]**
**सौधर्मेन्द्रस्तुतं[३] श्रुत्वा तद्रूपं वीक्ष्य संसदि।**
**द्वौ देवावूचतुस्तम्भोश्चक्रिन्! शृणु यथाश्रुतम्॥१३॥[१३७]**
**रूपं तथैव ते हेतु[४]र्न्यूनमद्येक्षणान्मनाक्[५]।**
**श्रुत्वेति चक्री निर्विद्य दीक्षितो वि[६]तपश्चरन्॥१४॥[१३८]**
**प्राप्तर्द्धिः प्रसहन्व्या[७]धीन् सौधर्मेण पुनः स्तुतः।**
**वेषीभूया[८]मरः कश्चित्तं परीक्षितुमागतः॥१५॥[१३९]**
**भो मुने! हन्मि ते व्याधीनित्युक्तस्तेन सोऽवदत्।**
**शरीरस्पर्शमात्रेण पश्य[९] शाम्यन्ति मे गदाः॥१६॥[१४०]**
**हरजन्मजरादींश्चेदसि वैद्य इतीरितः[१०]।**
**तं स्तुत्वागात्स[११] गां[१२] सो[१३]ऽपि हत्वा कर्माण्यकायताम्[१४]॥१७॥[१४१]**

---

१ =विचित्राख्य नगरस्य नाथो नरपति नामा।
२ =सुमित्रस्य।
३ =तस्य रूपम्।
४ =कारणं किन्नु वर्तते।
५ =ईषत्।
६ =विशिष्टम्।
७ =सङ्क्लेशं विना सहमानः।
८ =वैद्यवेषं धृत्वा।
९ =हस्तस्पर्शेन स्वव्याधिं प्रशमय्य प्रत्यय उत्पादितः।
१० =कथितः।
११ =देवः।
१२ =स्वर्गम्।
१३ =चक्री।
१४ =सिद्धत्वमगात्।

## ॥श्रीधर्मनाथ-सुदर्शन-पुरुषसिंह-मधुक्रीड-मघव-सनत्कुमारचरितं पञ्चदशम्॥१५॥

**श्रीषेणो मलये योऽभूद्देशे रत्नपुरे नृपः।**
**इन्द्रोपेन्द्रौ सुतौ सिंहनन्दितानिन्दिताख्ययोः[१]॥१॥[१४२]**

**पत्न्योः सोऽजीजनद्विप्रस्त[२]त्प्रि[३]या सत्यभामिका।**
**स[४] पञ्चा[५]श्चर्यमादित्यगत्यरिञ्जयचारणौ॥२॥[१४३]**

**सन्तर्यान्नेन सो[६]ऽबध्नात्पुण्यं ताश्चा[७]नुमोद्य तत्[८]।**
**पुत्रावनन्तमतियुद्धग्नाज्ञावनु[९] सो[१०]ऽन्यदा॥३॥[१४४]**

**रन्तुं गतो वने घ्रात्वा विषपुष्पं मृतः समम्।**
**ताभिश्च धातकीखण्डप्राग्मेरूदक्कुरावभूत्॥४॥[१४५]**

**सिंहनन्दितया भोगान् भुक्त्वा तत्रा[११]र्यया[१२]थ सः।**
**सौधर्मेऽभूत्सत्यभामापत्नीकोऽनिन्दिताचरः॥५॥[१४६]**

---

१ =पत्न्योर्भार्यययोर्विषये सुतौ अजीजनत्।

२ =कपिलः।

३ =मगधदेशाचलग्रामवास्तव्यविप्रधरणीजटसत्कदासीपुत्रस्य कपिलाख्यस्य पत्नी।

४ =राजा।

५ =रत्नवृष्टिः पुष्पवृष्टिः सुरदुन्दुभिनिस्वनः। सुवातः साधुवादश्च दानस्याश्चर्यपञ्चकम्॥१॥ पञ्चाश्चर्यसहितम्।

६ =राजा।

७ =तिस्रः अबध्नन्।

८ =दीयमानं दानम्।

९ =इन्द्रसेनपत्न्याः श्रीकान्तायाः विलासिन्यै अनन्तमतिनाम्न्यै युधिभग्ना आज्ञायकाभ्यां तौ निमित्तीकृत्य।

१० =राजा।

११ =उदक्कुरौ।

१२ =पत्नीभूतया।

**आर्योऽपि तौ मिथः प्रीतौ श्रीषेणार्य[१]चरोऽमरः।**
**अत्रा[२]मितादितेजस्को द्विश्रेणीट् तत्प्रिया[३]प्यभूत्॥६॥[१४७]**

**त्रिपृष्ठविष्णुमत्रैत्य[४] स्वयम्प्रभावृतत्सुखम्[५]।**
**सुतारा तत्स्वसा[६] श्यालीभूतं श्रीविजयाह्वयम्[७]॥७॥[१४८]**

**तां[८] हृतां प्राग्भवप्रेम्णाशनिघोषखगेशिना।**
**प्रत्यानीया[९]हवाद्देशसंयमं[१०] विजहार्हतः॥८॥[१४९]**

**स[११] गृहीत्वा चिरन्तप्त्वा मासायुः प्रायतो[१२] मृतः।**
**कृत्वाष्टाहमहं सख्या[१३]मानतेऽभून्निदानिना[१४]॥९॥[१५०]**

**ततोऽत्र वत्सकावत्यां प्रभाकार्यां बलाच्युतौ।**
**स्तः स्मापराजितानन्तवीर्यौ स्तैमितसागरौ[१५]॥१०॥[१५१]**

**सिद्धविद्यौ नर्तकीप्सुं दमितार्यर्धचक्रिणम्।**
**हत्वा तत्र हरिर्भुक्त्वा महीं घार्मोंऽहसाजनि[१६]॥११॥[१५२]**

---

१ =श्रीषेणार्यचरो देवः श्रीप्रभनामा श्रीनिलये विमाने जातः। श्रीषेणपत्नी च विद्युत्प्रभाख्या सिंहनन्दिभार्याचरी। तथानिन्दितार्याचरो देवः विमलप्रभाख्यो विमलप्रभविमाने जातः तत्पत्नी च शुक्लप्रभाख्या सत्यभामार्याचरी। सिंहनन्दिताचरी ज्योतिःप्रभा जाता। सत्यभामाचरीसुता राजा जाता।

२ =अस्मिन् भरतक्षेत्रे विजयार्धदक्षिणश्रेण्यो रथनूपुरचक्रवालपुरे।

३ =ज्योतिःप्रभा।

४ =अत्र भूमौ पित्रा सहागत्य।

५ =सुखं यथा भवति।

६ =अमिततेजसो भगिनी।

७ =विमलप्रभचरम्।

८ =सुताराम्।

९ =सङ्ग्रामं विधाय।

१० =गृहीत्वा।

११ =अमिततेजाः।

१२ =संन्यासात्। आष्टाह्निकं कृत्वा द्वाविंशतिदिनसंन्यासेन।

१३ =श्रीविजयेन सह।

१४ =अमरगुरुमुनितो विश्वनन्दिभवादितः त्रिपृष्ठश्रियं श्रुत्वा कृतविष्णुलक्ष्मीनिदानेन।

१५ =स्तिमितसागरनृपपुत्रौ।

१६ =पापेन घर्मायां जातः।

रामोऽच्युते[१]न्द्रस्तपसा तात(ततोऽ)हीन्द्रभुवा[२] दृशा।
खगेड्भूतं तपः प्राप्य तं[३] निन्ये स[४] प्रतीन्द्रताम्॥१२॥[१५३]

च्युत्वेन्द्रो मङ्गलावत्यां चक्री वज्रायुधोऽभवत्।
युवराजोऽन्यः[५] सहस्रायुधः क्षेमङ्करीपतेः॥१३॥[१५४]

शुद्ध[६]दृक्सावधिश्च[७]क्री तपसापाहमिन्द्रताम्[८]।
सानुजः पुष्कलावत्यामथासौ पुण्डरीकिणीट्॥१४॥[१५५]

जज्ञे घानरथि[९]र्मेघरथो दृढरथोऽपरः[१०]।
प्रबोध्य कुक्कुटौ गृध्रकपोतौ चाप्यवन्यताम्॥१५॥[१५६]

दत्तीज्याव्रतशीलाप्तपुण्याद्दृषिस्तपः श्रितः।
पितुस्तीर्थकृतो बद्धतीर्थकृत्त्वः सहानुजः॥१६॥[१५७]

सर्वार्थसिद्धौ प्राप्तः शं भुक्त्वास्मिन्विश्वसेनतुक्।
कामः शान्तिरभूच्चक्री तीर्थकृच्चानुजानुजः[११]॥१७॥[१५८]

चक्रायुधो गणेशश्च[१२] जात्वीशः स्वं विभूषयन्।
दृष्ट्वादर्शे निजच्छायाद्वयमुद्भूतबोधिकः॥१८॥[१५९]

---

१ =अजनि।

२ =उत्पन्नेन सम्यक्त्वेन।

३ =अनन्तवीर्यचरम्।

४ =अच्युतेन्द्रः।

५ =प्रतीन्द्रः।

६ =ईशानेन्द्रस्तुतदर्शनविशुद्धिस्तच्छ्रवणादायातेन कृतवादेन विचित्रभूतदेवेन पूजितस्तथा विद्युद्दंष्ट्रचरखेटकृतोपसर्गं भक्त्याप्राप्तचक्रश्रीश्च।

७ =अनुगाम्यवधियुक्तः।

८ =उपरिमग्रैवेयका-(द्वे?) विमाने सौमनसाख्ये।

९ =घनरथाख्यतीर्थकरपुत्रः।

१० =द्वितीयः।

११ =पूर्वमनुजः। इदानीमप्यनुजश्चक्रायुधः।

१२ =भाविनि भूतवदुपचारः।

**संयम्य जीवन्मुक्तोऽभूत्तौ[१] भव्यान् भववारिधेः।**
**उद्धृत्य निर्वृत्तिं प्राप्तौ दिश्यास्तां नः शिवश्रियम्॥१९॥[१६०]**

**श्रीषो(षे?)णो भोगभूम्यार्यः सौधर्मे श्रीप्रभामरः।**
**खगेन्द्रोऽमिततेजस्क आनते त्रिदशो बलः[२]॥२०॥[१६१]**

**योऽच्युतेन्द्रोऽभवच्चक्री बुधो ग्रैवेयकामरः।**
**नृपो मेघरथोऽन्त्योऽहमिन्द्रः शान्तिः स पातु नः॥२१॥[१६२]**

॥इति श्रीशान्तिनाथपुराणं षोडशम्॥१६॥

**सुसीमेट् प्राग्विदेहेऽधिवत्सं सिंहरथोऽत्रजः।**
**दिवो[३]ल्कापातमालोक्य दीक्षितो वृषभाद्गुरोः॥१॥[१६३]**

**बद्धतीर्थकरत्वोऽगादन्त्यां दिवम[४]तः सुतः[५]।**
**यो भूत्वा सूरसेनस्य कुरुराजस्य[६] हास्तिने॥२॥[१६४]**

**प्राप्य चक्रिश्रियं जातु रन्त्वागच्छन्वनान्मुनिम्[७]।**
**दृष्ट्वा तपस्थं भुक्त्वेन्द्रचक्रित्वे[८] एष मोक्ष्यते॥३॥[१६५]**

**इत्येवं मन्त्रिणा पृष्टो दृष्टपूर्वभवस्तपः।**
**कृत्वार्हन्त्यं गतश्चक्रे तीर्थं कुन्थुं नमामि तम्॥४॥[१६६]**

॥श्रीकुन्थुनाथस्य सप्तदशम्॥१७॥

**कच्छाक्षेमपुरे तद्व[९]द्योऽभूद्धनपतिर्नृपः।**
**नन्दतीर्थकरात्प्राप्तसंयमोऽर्जित[१०]तीर्थकृत्॥१॥[१६७]**

---

१ =तीर्थकृद्गणधरौ।

२ =अपराजितः।

३ =दिवसे।

४ =सर्वार्थसिद्धिम्।

५ =श्रीकान्तागर्भे।

६ =कुरुवंशोत्पन्नस्य।

७ =कञ्चिदातपयोगस्थम्।

८ =चेत्कदाचिदस्मिन् भवे न मोक्ष्यते। तर्हि इन्द्रचक्रित्वे भुक्त्वा मोक्षं यास्यति।

९ =जम्बूद्वीपप्राग्विदेहे।

१० =ऊर्जितपाठे ऊर्जितमुपार्जितम्।

**गत्वा जयन्तमागत्य हास्तिनेशात्सुदर्शनात्।**
**प्राप्तजन्मात्र[१] चक्रश्रीः[२] शरन्मेघक्षये क्षणात्॥२॥[१६८]**

**आदाय संयमं लब्धा(ब्ध्वा) केवलं धर्मदेशनात्।**
**विश्वमुद्धृत्य यः सिद्धः स्मरामि तमरप्रभुम्॥३॥[१६९]**

**भूपालाख्यो नृपोऽत्रा[३]सीज्जितो युद्धेऽरिभिस्त[४]पः।**
**सम्भूतान्ते स कृत्वागान्महाशुक्रं निदानवान्[५]॥४॥[१७०]**

**सहस्रबाहुरिक्ष्वाकुः साकेतेऽजनि तत्प्रिया।**
**जाता चित्रमतिः कन्याकुब्जराट् पारतात्मजा[६]॥५॥[१७१]**

**तत्पु[७]त्रः कृतवीरश्च तापसस्तत्पितृव्यजः[८]।**
**जमदग्निर्दृढग्राहिहरिशर्मचरामरौ[९]॥६॥[१७२]**

**अपुत्रस्य गतिर्नास्तीत्यार्षेष्वा[१०]कीचकाकृती[११]।**
**परिणयितवन्तौ तं(तां) रेणुकीं पारताङ्गजाम्[१२]॥७॥[१७३]**

**सा कामधेनुपरशू[१३] स्वाग्रजारिं जयान्मुनेः।**
**स्वीकृताणुव्रता लेभे ज्ञात्वायातः[१४] स्वमाश्रयम्॥८॥[१७४]**

---

१ =मित्रसेनागर्भे।

२ =चक्रश्रीर्यस्य स प्राप्तजन्मा।

३ =जम्बूद्वीपभरते विशालपुरे।

४ =एकीभूतबहुशत्रुभिः।

५ =भूयान्मे चक्रित्वमिति।

६ =पारतनृपस्य पुत्री चित्रमतिः।

७ =तस्य सहस्रबाहुनृपस्य।

८ =सहस्रबाहोः पितृव्यः शतबिन्दुः तस्य भार्या श्रीमती सा पारतस्य भगिनी। तस्याः श्रीमत्याः पुत्रो जमदग्निः।

९ =द्वौ जमदग्निं परिणायितवन्तौ।

१० =पुराणेषु।

११ =आ मर्यादायाम्। पक्षिविशेषमिथुनीभूतौ।

१२ =चित्रमतीभगिनीम्।

१३ =द्वे विद्ये लेभे।

१४ =आगतः।

**राजा[१] स नाभिः ससुतो भोजितो जमदग्निना।**
**तं हत्वा कामधेनुं तां लात्वा यातः[२] फलादिकम्[३]॥९॥[१७५]**

**आहृत्यायान्निद्रा(?)रामः सानुजस्तत्सुतः[४] क्रुधा।**
**हत्वा त्रिः सप्तकृत्वोऽन्यान् क्षत्रियांश्चाभुनग्भुवम्[५]॥१०॥[१७६]**

**हृत्वा[६] तद्विधुरे[७] चित्रमतिं प्राग्देव[८]गर्भिणीम्।**
**शाण्डिल्यस्तापसो न्यस्य[९] सुबन्धुमुनिसन्निधौ॥११॥[१७७]**

**तदग्रजः[१०] सारयितुं[११] जगाम स्वमठीं तदा।**
**वनदेवीभिरीशत्वात्त्रातं[१२] सुतमसूत सा॥१२॥[१७८]**

**षोडशेऽब्दे ह्ययं भावी चक्रीह[१३] प्रत्ययं[१४] शृणु।**
**साग्निचुल्लीगतस्थूलकिलास[१५]घृतमध्यगान्॥१३॥[१७९]**

**उष्णानपूपानादाय भक्षयिष्यत्ययं शिशुः।**
**इति सो[१६]ऽसान्त्वयत्पृ[१७]ष्टो निग्र(र्ग्र?)न्थस्तां सुदुःखिताम्॥१४॥[१८०]**

---

१ =सहस्रबाहुः।
२ =गतः।
३ =आहृत्य गृहीत्वा।
४ =जमदग्निपुत्रः।
५ =पालयामास।
६ =गृहीत्वा।
७ =सहस्रबाहुमरणदुःखे।
८ =भूपालचरमहाशुक्रामरेण गर्भस्थेन।
९ =संस्थाप्य।
१० =चित्रमतिज्येष्ठभ्राता शाण्डिल्यः।
११ =स्वमठसम्भालकरणार्थम्।
१२ =रक्षितम्।
१३ =अस्मिन् भरते।
१४ =विश्वासवचनम्।
१५ =कटाहः।
१६ =सुबन्धुगुरुः।
१७ =स्वास्थ्यमनयत्।

ततः प्रत्येत्य[१] शाण्डिल्यस्तां नीत्वा ससुतां मठीं।
सुभौमनाम्ना[२] शास्त्रैस्तत्प्रयोगैश्चायुजत्सुतम्॥१५॥[१८१]

रामो यस्याश्नतो[३]ऽन्नीस्युः[४] क्षत्रदन्ताः[५] स ते रिपुः।
जातो यतस्त्वेप्सुहितो[६] निमित्तज्ञेन[७] निर्ममौ[८]॥१६॥[१८२]

सत्रं बहिरयोध्यायास्तं परिव्राजकाकृतिम्[९]।
तन्नाश्नन्तं[१०] स[११] निश्चित्य तथैवोच्छेत्तुमु[१२]द्यतः॥१७॥[१८३]

तत्काल[१३]सिद्धवज्रेण हतस्तेनेभवर्तिना[१४]।
तपसा क्रीतचक्रिश्रीरसास्वादनलम्पटः॥१८॥[१८४]

स सूपकारमन्येद्युर्दत्तवन्तं मुदाम्लिकाम्।
रसायनाह्वां[१५] तद्वैरि[१६]कोपितोऽघातयत्कुधीः॥१९॥[१८५]

इमं वध्यासमित्यात्तशल्योऽसौ पुण्यलेशतः।
ज्योतिर्लोकेऽमरो वैरात्कुज्ञानी ज्योतिषोऽजनि॥२०॥[१८६]

---

१ =पश्चादागत्य।

२ =शोभनां मुनिपादपवित्रां भूमिमाश्लिष्य जात इति सुभूमौ भवः।

३ =भोजनं कुर्वतः यस्य पुंसः।

४ =कलमान्नं भवेयुः।

५ =त्वन्निहतक्षत्रियदन्ताः।

६ =आत्मनः हितवाञ्छकः।

७ =निमित्तकुशलाख्येन रामो भणितः।

८ =शत्रम् अन्नदानशालां निष्पादयामास।

९ =त्रिदण्डियतिवेषधारिणम्।

१० =स चासौ न अश्नन्। तं तन्नाश्नन्तम्।

११ =रामः।

१२ =मारयितुम्।

१३ =स चासौ कालस्तत्कालः।

१४ =गन्धगजारूढेन।

१५ =नाम्नीम्।

१६ =सूपकारशत्रु(त्रुः)।

**दिव्यैः फलैः प्रवेश्याब्धिं पोतना(?)मारयत्खलम्।**
**प्राग्जन्माकृतिमादर्श्य वैरञ्चोक्त्वाक्षिपन्मु[१]नेः[२]॥२१॥[१८७]**
**सुतो रामो जामदग्नी रौद्रध्यानादधोऽगमत्।**
**सहस्रबाहुस्तत्पुत्रो[३] लोभात्तिर्यग्गतिं गतौ॥२२॥[१८८]**
**राजपुत्रस्तपोऽत्रै[४]कश्चकाराशयशल्यवान्[५]।**
**सुकेतोः प्राप्य सौधर्मं च्युतौ[६] चक्रपुरेशिनः॥२३॥[१८९]**
**इक्ष्वाकोर्वरसेनस्य तावभूतां सुताविह।**
**नन्दिषेणो बलः पूर्वः पुण्डरीको हरिः परः॥२४॥[१९०]**
**पद्मावतीमिन्द्रपुराधीश्वरोपेन्द्रसेनजाम्।**
**तमू[७]ढवन्तमा[८]कर्ण्य सुकेतुचरचक्रभृत्[९]॥२५॥[१९१]**
**निसुम्भाख्यः क्रुधा युध्यन्[१०] हतस्तेना[११]प स द्विषन्[१२]।**
**हरिस्तमःप्रभां[१३] रामः शिवघोषाच्छिवं गतः॥२६॥[१९२]**

॥श्री अरनाथ-सुभौमचक्रि-नन्दिषेण-बल-पुण्डरीक-विष्णु-तच्छत्रुनिसुम्भवृत्तोत्तरमष्टादशम्॥१८॥

**प्राग्मेरोः कच्छकावत्यां वीतशोकपुरेऽधिराट्।**
**योऽत्र[१४] वैश्रवणो जज्ञे स सुगुप्तगुरोर्गिरा॥१॥[१९३]**

---

१ =पुरुषवचोभिस्तिरस्कुर्वन्।
२ =जमदग्नेः पुत्रः।
३ =कृतवीरः।
४ =जम्बूद्वीपभरते।
५ =चित्ते शल्यवान्।
६ =मित्रवर्मसुदर्शनचरौ। आर्षे पञ्जिकायां विस्तारः।
७ =पुण्डरीकम्।
८ =परिणीतवन्तम्।
९ =अर्धचक्रीचक्रसुरपोषकश्च।
१० =युद्धं कुर्वन् सन्।
११ =पुण्डरीकेण।
१२ =सन्।
१३ =षष्ठं नरकं गतः।
१४ =जम्बूद्वीपपूर्वमन्दरस्य।

उपात्ताणुव्रतो[१]ऽभ्यस्तरत्नत्रयविधानकः।
जातुवर्षागमे द्रष्टुं वनश्रेणीं व्रजन् वटम्॥२॥[१९४]

पृथूदरोन्नतं दृष्ट्वा नानापक्षिकुलाकुलम्[२]।
प्रशस्याग्रे वनं गत्वा रन्त्वा गच्छन्निरीक्ष्य तम्[३]॥३॥[१९५]

विद्युता भस्मितं प्राप्तवैराग्योऽनुचरंस्तपः।
श्रीनागयतिसान्निध्ये तीर्थकृत्त्वमुपार्ज्य च॥४॥[१९६]

प्राप्तोऽपराजितं तस्माच्च्युतोऽत्र[४] मिथिलापतेः।
वङ्गे[५] कुम्भस्य पुत्रो[६]ऽभूदिक्ष्वाकोः स्वकरग्रहे[७]॥५॥[१९७]

पुरोपशोभां दृष्ट्वासौ श्रियं स्मृत्वापराजिताम्।
विरक्तस्तपसार्हन्त्यं प्राप्तो मल्लिः पुनातु नः॥६॥[१९८]

श्रीपुरेऽभूत्सुकच्छायां[८] प्रजापालोऽत्र स श्रितः।
उल्कापाताच्छैवगुप्तं[९] तपो भुक्त्वाच्युतेन्द्रताम्॥७॥[१९९]

काशीशः[१०] पद्मनाभस्य पुत्रोऽस्य तृतीये[११]ऽजनि।
चक्री पद्मोऽब्द[१२]विलयात्संयमेच्छुः सुकेतुना॥८॥[२००]

---

१ =उपात्तं सुगुप्ताचार्यवाचा गृहीतमणुव्रतं येन स(सः)।
२ =समूहव्याप्तम्।
३ =तं वटवृक्षम्।
४ =भरते।
५ =वङ्गदेशे।
६ =प्रजावतीगर्भे।
७ =त्रिभुवनरतिकन्यया सह विवाहे सति।
८ =देशे।
९ =शिवगुप्ताचार्येण प्रोक्तं शैवगुप्तम्।
१० =काशिनृपस्य।
११ =भवे।
१२ =मेघ(घः)।

**कुलवृद्धेन चार्वाकमतेनोक्तः प्रबोध्य तम्।**
**सुकेत्वादिनृपैः[१] सत्रा[२] तपस्तेपे शिवोऽभवत्[३]॥९॥[२०१]**

**वीरोऽयोध्याधिपोऽमात्याद्विरम्यै[४]तत्सुताविमौ।**
**श्रीयोग्याविति तौ त्यक्त्वा स्नेहेन स्वानुजाय[५] सः॥१०॥[२०२]**

**यौवराज्यपदं प्रादात्ततस्तौ कुपितौ भृशम्।**
**मन्त्रिणानेन तत्रा[६]वां निषिद्धावित्यतः श्रितौ[७]॥११॥[२०३]**

**शिवगुप्ताद्धर्म[८]तीर्थे तपः सौधर्ममापतुः।**
**तत्राद्योऽग्निशिखे[९]क्ष्वाकुकाशीशोऽभूत्सुतो बलः॥१२॥[२०४]**

**नन्दिमित्रो[१०] हरिर्दत्तः श्रीच्छोऽन्यो[११] मन्दरे पुरे।**
**मन्त्री खेन्द्रो बलीन्द्राख्यः सो[१२]ऽभूत्क्षीरोदसञ्ज्ञकम्॥१३॥[२०५]**

**याचमानो गजं लब्धमहाविद्येन मातुलात्[१३]।**
**दत्तेनागाद्धतः सोऽन्त्यं श्वभ्रं सारिर्बलोऽच्युतिम्[१४]॥१४॥[२०६]**

---

१ =चार्वाकमतत्यागानन्तरम्।

२ =सह।

३ =सिद्धो मुक्तात्माभूत्।

४ =सचिवात्पुत्रयोर्विरम्य विरक्तो भूत्वा।

५ =यौवराज्यं प्रादात्।

६ =राज्यपदे।

७ =तपः।

८ =श्रीधर्मनाथसन्ताने।

९ =अग्निशिखनाम्नो नृपस्य।

१० =बलभद्रः।

११ =पिशुनमन्त्रिचरः।

१२ =अन्यः पिशुनमन्त्री।

१३ =दक्षिणश्रेणिसुरकान्तारपुराधिपात्।

१४ =मुक्तिमगात्।

॥श्रीमल्लिनाथतीर्थंकर-पद्मचक्रि-नन्दिमित्र-रामदत्ताख्यकेशव-
तच्छत्रुबलीन्द्रचरितावसानमेकोनविंशम्॥१९॥

**हरिवर्मात्र चम्पेशः सर्वज्ञानन्तवीर्यतः।**
**तत्त्वं श्रुत्वास्तसङ्गोऽभूत्प्राणतेन्द्रोऽन्त्यनामयुक्॥१॥[२०७]**

**हरिवंशे सुमित्रस्य पुत्रो[१] राजगृहेशिनः।**
**स भूत्वा क्ष्मामवन्मेघगर्जितात्स्ववनस्मृतेः॥२॥[२०८]**

**गजं ग्रासमगृह्णन्तं श्रावयित्वा पुरा भवम्।**
**आसीत्तालपुरेशस्त्वं नाम्ना नरपतिर्नृपः॥३॥[२०९]**

**कुधीः कुपात्रदानेन जातो हस्ती वनं स्मरेः[२]।**
**न प्राग्वृत्तमिति प्राप्य[३] श्रावकत्वं विरक्तवान्॥४॥[२१०]**

**प्रपद्य साम्यं कैवल्यं लब्ध्वा तीर्थं व्यधादसौ।**
**मुनिसुव्रतनाथो नः सुव्रताय प्रसीदतात्॥५॥[२११]**

**नराभिरामे[४]ऽनन्तार्हत्तीर्थनरपुरेश्वरः।**
**सनत्कुमारं[५] तपसा प्राप्य भोगपुरः प्रभोः॥६॥[२१२]**

**इक्ष्वाकोः पद्मनाभस्य हरिषेणोऽभवत्सुतः।**
**तत्पिता[६]नन्तवीर्येशाद्यतिः स[७] श्रावकोऽप्यभूत्॥७॥[२१३]**

**चक्रादीन्यसिधँस्तस्य पितुः केवलसम्भवे।**
**तं प्राच्यार्चितचक्रोऽसौ चिद्रत्नान्याप सप्त च॥८॥[२१४]**

**निधीन्नदीमुखोत्थाँश्च गणबद्धामरार्पितान्।**
**भुक्तश्रीर्जात्वसौ राजा कृतनन्दीश्वरार्चनः॥९॥[२१५]**

---

१ =सोमागर्भे।

२ =न स्मरसि।

३ =प्रापयित्वा।

४ =मनोहरे।

५ =तपसा स्वर्गम्।

६ =यतिरभूत्।

७ =हरिषेणचक्री।

**अन्ते ह्युपोषितः सौधतलस्थो ग्रहणं विधोः।**
**दृष्ट्वात्तदीक्षः श्रीनागात्तपसान्त्यां दिवङ्गतः॥१०॥[२१६]**

**जातौ दाशरथौ रामलक्ष्मणौ बलकेशवौ।**
**तद्वृत्तं बहुवक्तव्यमित्यतः पृथगुच्यते॥११॥[२१७]**

॥अथ रामायणम्॥

**जातोऽत्रा[१]न्त्यतनो रत्नपुरे राज्ञः प्रजापतेः।**
**तुक्चन्द्रचूलस्तन्मित्रं विजयाख्यश्च मन्त्रितुक्॥१२॥[२१८]**

**विवाह्यमानां कौबेरीं[२] श्रीदत्तेना[३]तिशायिनीम्।**
**कुबेरदत्तां श्रुत्वा[४]सौ समित्रो लातुमु[५]द्यतः॥१३॥[२१९]**

**वणिक्पूत्कारतो राज्ञादिष्टेन पुररक्षिणा।**
**जिघांसितः[६] स्वयं हन्तुं तं[७] जित्वा मन्त्रिणो नृपम्॥१४॥[२२०]**

**वध्या[८] वेवेति संरब्धं[९] महाबलगणेशिना।**
**संयमेलां[१०] ततस्तीव्रं तपस्यन्[११] पुरुषोत्तमम्[१२]॥१५॥[२२१]**

**जित्वा दिशः स्वनगरं विशन्तं वीक्ष्य केशवम्।**
**ईदृग्भूयामितीष्टश्रीस्तृ[१३]तीयं कल्पमापिवान्॥१६॥[२२२]**

---

१ =जम्बूद्वीपभरते।
२ =कुबेराख्यवणिक्पुत्रीम्।
३ =गौतमावैश्रवणपुत्रेण।
४ =महापापिष्ठस्वानुचरात्।
५ =स्वसात्कर्तुम्।
६ =हन्तुं वाञ्छितः।
७ =कुमारम्।
८ =मारितौ गणेशिना।
९ =प्रयत्नाविष्टं यथाभवति।
१० =सम्यग्यमभूमिम्। श्मशानम्। पक्षे संयमभूमिम्। चारित्रं प्रति।
११ =तपः कुर्वन् चन्द्रचूलः।
१२ =अनन्तजिनतीर्थे वीक्ष्य।
१३ =इष्टा श्रीर्यस्य सः।

ततः[१] काश्यां सुबलायां देव्यां दशरथाद्बलः।
रामोऽभूद्विजयां कोऽन्यः[२] केकय्यां लक्ष्मणो हरिः॥१७॥[२२३]

महाकालासुरीभूतस्तपसा मधुपिङ्गलः।
जज्ञेऽहन्[३] सुलसा[४]वैरात्सामात्यं सगरं द्विजः[५]॥१८॥[२२४]

अस्मत्पुरी पुरेत्येत्य[६] स तुग्दशरथो वसन्।
अयोध्यां भरतं देव्यां शत्रुघ्नं वा[७] त्वजीजनत्॥१९॥[२२५]

भारते धातकीखण्डे प्राचि[८] सारसमुच्चये।
देशे नाकपुरे राजा नरदेवो वृषश्रुतेः[९]॥२०॥[२२६]

प्रव्रज्योग्रं तपः कुर्वन् खगेट् चपलवेगतः।
कृत्वा निदानं सौधर्मं गत्वातोऽजनि रावणः॥२१॥[२२७]

पौलस्त्यः[१०] सप्रियो रन्तुं सोऽगाद्रूप्याद्रिकानने।
विद्या सिद्ध्युद्यतां तत्रालकेशामितवेगजाम्॥२२॥[२२८]

द्वादशाब्दोपवासार्ता[११] दृष्ट्वा मणिमतिं क्षणात्।
कामार्तोऽविघ्नयद[१२]स्यैषा[१३]पि वध्यासमात्मजा॥२३॥[२२९]

---

१ =तृतीयकल्पात्।

२ =चन्द्रचूलः।

३ =हन्ति स्म।

४ =चारणयुगलपुरे सुयोधनातिथिपुरी।

५ =द्विजवेषधारी महाबालासुरः स्वयं ब्रह्मा भूत्वा पर्वतमाचार्यं कृत्वा शत्रूच्छेदलक्ष्मीनिमित्ते यज्ञेऽहन् हन्ति स्म।

६ =पुरा पूर्वम् एषा पुरी अस्मदीया इति कारणादेत्य आगत्य।

७ =यथा भरतं तथा शत्रुघ्नं कस्यांचिद्देव्याम्।

८ =पूर्वमन्दरे।

९ =अनन्ताख्यगणेशात्।

१० =पुलस्त्यस्यापत्यं मेघश्रियाम्।

११ =क्लेशकृशीकृताम्।

१२ =विद्यासिद्धेरभ्रंशयत्।

१३ =एषाहं अस्य रावणस्य आत्मजां भूत्वा इमं वध्यासम्।

भूत्वेममिति सङ्कल्पाज्जाता मन्दोदरीसुता।
तज्जन्मदिनभूकम्पाद्यु[१]त्पातात्स्वमृतिं विदन्॥२४॥[२३०]

नीत्वेमां क्वापि मुञ्चेति लङ्केणमारीचिमादिशत्।
तन्मुक्तां[२] वीक्ष्य तद्गर्भमञ्जूषां मिथिलावने[३]॥२५॥[२३१]

कर्षद्भिस्तद्भुवं सीरैः[४] सौधाया[५]नीय ढौकिताम्।
उद्घाट्य जनको लेखाज्ज्ञाततत्त्वो ददौ मुदा॥२६॥[२३२]

सीताख्यां वसुधादेव्यै पण्डिता सा पुपोष ताम्।
सा[६]पि भूगेहगां[७] प्रेम्णा गुणयन्ती कलाः कलाः[८]॥२७॥[२३३]

तां यौवनोल्लासतुङ्गां याचमानेषु भूरिषु।
दृष्ट्वेमां जनकोऽन्येद्युः सदस्यूचे चमूपतिम्[९]॥२८॥[२३४]

यज्ञे हुताः[१०] प्राक्सुलसावाजीभसगरादयः।}
सदेहाः स्वर्य[११]युरिति श्रूयते तत्क्रियेत सः[१२]॥२९॥[२३५]

---

१ =आदिशब्दात्। भूभेद(दः)। दिवातारा। रात्रीन्द्रायुधजिनप्रतिमाचलनादि।

२ =मारीचि मन्त्रिणा मुक्ताम्।

३ =पुरोद्यानसमीपे।

४ =हलैः।

५ =आवासनिमित्तम्।

६ =पण्डिता।

७ =यथा रावणो न वेत्ति।

८ =मनोहराः।

९ =कुशलमतिसञ्ज्ञम्।

१० =सन्तः।

११ =स्वः स्वर्गम्।

१२ =यज्ञः प्रसिद्धः।

**तच्छ्रुत्वाख्यत्स[१] साध्वेतत्किन्त्वेष विधिरासुरः[२]।**
**विहन्यते[३] नागखगै[४]र्ध्रुवं शङ्कात्र[५] रावणात्॥३०॥[२३६]**

**सीतां रामाय दास्याम[६] इत्युक्त्वा रामलक्ष्मणौ।**
**तद्रक्षार्थं तदानेयौ मिथिलेशस्तदाशृणोत्[७]॥३१॥[२३७]**

**दूतात्तदु[८]क्तं श्रुत्वाप्तैः[९] कोशलेशो[१०] व्यचारयत्।**
**ते[११] च श्रेयोऽनुबन्धित्वात्तदी[१२]षुर्व्य[१३]भजन्म[१४]खम्[१५]॥३२॥[२३८]**

**वैराग्यक्षान्त्यनशनैः कामक्रोधोदराग्निषु।**
**हुत्वा[१६]त्मयज्ञं निर्वान्ति[१७] वनस्थाः श्रमणा इति॥३३॥[२३९]**

**आर्षोऽनार्षः स यत्रार्हद्ग[१८]णिकेवलिवर्ष्मणाम्।**
**संस्काराग्निषु गन्धादीन् हुत्वा सिद्ध्यन्ति गेहिनः॥३४॥[२४०]**

---

१ =चमूपतिः।
२ =महाकालासुरेण प्रोक्तः।
३ =विघ्न्यते।
४ =जिनशासनपक्षपातीयैर्नागैः। खगैर्नागानुग्रहस्मर्तृत्वात्।
५ =यज्ञे।
६ =वयम्।
७ =चमूपतिवाक्यम् अभ्युपगच्छति स्म।
८ =जनकसन्दिष्टम्।
९ =पुरोहितमन्त्रिप्रमुखैः सह।
१० =दशरथः।
११ =आप्ताः।
१२ =रामलक्ष्मणयोर्यज्ञरक्षार्थं मिथिलायां प्रयाणम्।
१३ =मन्यन्ते स्म।
१४ =या चक्षुः आर्षानार्षविभागेन।
१५ =यज्ञम्।
१६ =कृत्वा शुद्धस्वात्माराधा(ध)नं च।
१७ =नृलोके सिद्धाः सिद्ध्यन्ति सेत्स्यन्ति।
१८ =तीर्थकरगणधरेतरसर्वज्ञशरीराणां हुत्वा विधिवत्प्रयुज्य सिद्ध्यन्ति क्रमेण मुच्यते।

**हिंसायागं तु सगर[१]विश्वभ्वादिर्द्विषां व्यधात्।**
**दुर्गत्यै पर्वतमुखेनासुरस्तत्स[२] दूष्यताम्[३]॥३५॥[२४१]**

**अजैर्हो[४]तव्यमित्यत्र नारदेन[५] तिरस्कृतः[६]।**
**पर्वतोऽसुरतो[७] यज्ञे तीर्थे[८] सोऽघातयत्प[९]शून्॥३६॥[२४२]**

**महाकालश्चतुष्षष्ठिसहस्रासुरराट् शठः[१०]।**
**तं[११] कृत्वाध्यापयत्षष्ठिमृच्(क्)सहस्राण्यथर्वणि[१२]॥३७॥[२४३]**

**वसुः श्वभ्रम[१३]जैश्छागैरिति साक्ष्या[१४] सपर्वतः[१५]।**
**सर्वार्थसिद्धिं चाहिंसाधर्मेण नारदोऽगमत्॥३८॥[२४४]**

**रामोऽथ सर्वसामग्र्या पित्रादिष्टः सलक्ष्मणः।**
**गत्वा विदेहां[१६] तद्भर्तुः[१७] क्रतुं[१८] निष्ठाप्य तत्सुताम्॥३९॥[२४५]**

**विवाह्योड्ढ्य(?)श्रियं प्राप्तः साकेतं परिणायितः।**
**तातेनान्या राजकन्याः सप्त षोडश लक्ष्मणः॥४०॥[२४६]**

---

१ =सगरमन्त्रिमन्दोदरीप्रमुख।
२ =हिंसायागः।
३ =अश्रद्धेयतया रामस्योपदिष्यताम्।
४ =यवबीजं च त्रिवर्षमजमित्यभिधीयते। तद्विकारेण सप्तार्चिर्मुखे देवार्चनं विदुः।
५ =क्षीरकदम्बोपाध्याय शिष्येण देशान्तरायातेन।
६ =शिष्टसभायां पौरसङ्घसमक्षं प्रमाणबलेन निगृहीतः।
७ =महाकालासुरमाश्रित्य।
८ =यज्ञलक्षणे तीर्थे।
९ =लक्ष्मी शत्रूच्छेदनार्थम्।
१० =रोहितात्मा।
११ =तं पर्वतं पाठयति स्म।
१२ =अभिचारकेषु कर्मसु।
१३ =अगमत्।
१४ =साक्षीदानेन।
१५ =पर्वतसहितः।
१६ =नगरीम्।
१७ =विदेहाभर्तुः जनकस्य।
१८ =यज्ञम्।

**देवोदितोदितं कार्यं[१] गत्वा कुर्वीत सानुजः[२]।**
**इति रामेण विज्ञप्तोऽमुञ्चद्यु[३]क्त्यो[४]दितः[५] पुनः॥४१॥[२४७]**

**राज्येऽभिषिच्य तं तातो यौवराज्ये च लक्ष्मणम्।**
**विभू तत्ता[६]विधिष्ठाय[७] काशीमत्युदितौ[८] भृशम्॥४२॥[२४८]**

**गत्वा नन्दनवच्चि[९]त्रकूटाख्ये जातु तद्वने।**
**क्रीडित्वा प्रेयसीयुक्तौ स्थिताविन्द्रप्रतीन्द्रवत्॥४३॥[२४९]**

**नारदस्तौ तथा दृष्ट्वा रणैषी प्राप्य रावणम्।**
**प्रलोभ्य सीतारूपोक्त्या चक्रेऽतो[१०] हर्तुमुत्सुकम्॥४४॥[२५०]**

**मुक्तया[११] सू(शू)र्पणखया वृद्धयान्वीक्ष्य बोधिताम्[१२]।**
**सीतां हृतां[१३] समारीचः पुष्पकेणासदत्स खे॥४५॥[२५१]**

**तेन मारीचहेमैणात्सा[१४] रामेण वियोजिता।**
**तद्रूपेणा[१५]श्वगतं स्वं नीत्वा शिबिकया[१६] वनम्[१७]॥४६॥[२५२]**

---

१ =गुरुपरम्परायातं कार्यम्।

२ =रामो गत्वा कार्यं कुर्वीत।

३ =वात्सल्यादप्रस्थापयत्।

४ =क्षत्रियधर्मादिसमर्थनोपपन्ना।

५ =प्रतिपादितस्तातः। (त्रुटितः पाठः।)

६ =तत्तस्मात् राज्याभिषेकानन्तरम्।

७ =उद्दिश्य काश्यां स्थातव्यमेवेति सङ्कल्प्य।

८ =चलितौ।

९ =इन्द्रोद्याने यथा।

१० =एतस्मात् रूपकथनानन्तरम्।

११ =मारीचेन सह मन्त्रयित्वा प्रेषितया।

१२ =पतिव्रतात्वेन परीक्ष्य सम्बोधितां सीतां तद्वचनविरक्ताम्।

१३ =हृतां हर्तुमित्यर्थः।

१४ =मारीचं विचित्ररत्नखचितहेममृगीकृतं प्रयुज्यम्।

१५ =रामस्य रूपेण।

१६ =पुष्पकविमानमय्या।

१७ =सर्वर्तुकं नाम। लङ्कापरदिशि।

**तद्वृत्तं श्राविता शोकान्मूर्छितोन्मूर्ध्य[१] लोभिता[२]।**
**खगीभिरुज्झवागु[३]क्ता रामक्षेमश्रवावधि[४]॥४७॥[२५३]**

**तदोत्पातोदयादान[५]शासतः पथ्यमा[६]क्षिपत्[७]।**
**शस्त्रशालां द्विचक्रां[८] नाज्ञासीत्स द्विगुणोदयः[९]॥४८॥[२५४]**

**गृहीत्वा रोहिणीं राहौ गते भ्राम्यच्छशी[१०]त्यहम्।**
**स्वप्नेऽद्राक्षमिति प्रश्नाद्गृहीत्वा जानकीं गते॥४९॥[२५५]**

**रावणे राघवो वाणारस्यां दिष्टं[११] पुरोधसा।**
**पित्रा प्रस्थापिताल्लेखादाश्व(स्व?)स्थः[१२] सोऽरूषद्विषे॥५०॥[२५६]**

**अथै[१३]त्य नेमतुः खेटौ तं तत्रैकोऽवदत्प्रभो।**
**सुग्रीवोऽहं सुहृन्मेयं विक्रान्तो[१४]ऽमितवेगवाक्॥५१॥[२५७]**

**खगाड्यापाक्किलिकिले राड्वाली स ममाग्रजः।**
**पुरे क्रमागताद्यौवराज्यात्तेनाहतो गतः[१५]॥५२॥[२५८]**

---

१ =चेतनां प्रापय्य।
२ =प्ररोचनावाक्यैः स्वराज्यादिकं प्रति दर्शितलोभा साधोमुखी।
३ =त्यक्तगीर्जाता। मौनेन स्थिता।
४ =यथा स्यात्।
५ =ग्रहण(णम्)। सीतास्वीकरणकथकस्य।
६ =हितवचनं कर्तृ।
७ =प्राह।
८ =द्वितीयं रथाङ्गतं तस्योत्पातभूतं न जानाति स्म।
९ =स रावणः।
१० =भ्राम्यंश्चासौ शशी।
११ =प्रोक्तम्।
१२ =किञ्चित्स्वास्थ्यमापन्नः जीवत्सीताश्रवणात्।
१३ =रोषोत्पन्नानन्तरम्।
१४ =अव्याहतपराक्रमः खगकुमाराणामग्रे वामपादेनादित्यस्य हननात्।
१५ =निःसारितोऽहं सम्मेदं गतः।

**सम्मेदं ससखा प्राच्य्र्य जिनार्चास्तत्र नारदात्।**
**ज्ञात्वा पदाप्तिं[१] त्वत्प्रेषादत्रागां[२] तत्प्रसीद भो(भोः!)॥५३॥[२५९]**

**प्रेषो ममेत्यादिशच्चैनं प्रियां मे गवेषय।**
**तदुक्तो[३] हनुमाँल्लङ्कां गत्वा भूत्वालिरभ्रमत्॥५४॥[२६०]**

**वनेऽथ तां शिंशि(श)पाधोऽद्राक्षीद्रामोक्तलक्षणाम्[४]।**
**सप्तमेऽह्नि[५] तदात्रै[६]त्य प्रदोषे मञ्जरीगिरा[७]॥५५॥[२६१]**

**स्वयं चाभ्यर्थितां सीतामनिच्छन्तीं क्रुधा खगेट्।**
**तां जिघांसुर्नि[८]षिद्धोऽगान्म[९]न्दोदर्या दुराग्रही[१०]॥५६॥[२६२]**

**साथोचे तया जनन्या[११] सतीधुर्ये प्रसीद माम्।**
**भुङ्क्ष्व रक्ष वपुः पत्या युङ्क्ष्वे[१२]त्युक्ता[१३]पि नाब्रवीत्॥५७॥[२६३]**

**माता त्वेषा ममेत्यास्थच्चिन्तयन्ती प्रघट्टकम्।**
**तत्रा[१४]न्येष्व[१५]पि यातेषु[१६] वानरीभूय रक्षकान्॥५८॥[२६४]**

---

१ =स्थानप्राप्तिम्।
२ =अहमागतः।
३ =रामादेशात् सुग्रीवेण प्रेषितः।
४ =प्रेषदानकाले रामेण ज्ञापितस्वरूपाम्।
५ =हरणदिनात्।
६ =वने।
७ =मञ्जरी नाम दूती वाचा।
८ =कशादिना ताडितुमिच्छुः।
९ =स्वस्थानं गतः।
१० =सीतां भजाम्येवेति ग्रहाविष्टः।
११ =मन्दोदर्या।
१२ =संयोगं प्राप। रामेणैतच्छरीरं योजय।
१३ =मन्दोदर्यान्यैरपि परिजनादिभिरुक्तापि।
१४ =तस्यां मन्दोदर्याम्।
१५ =परिवारजनेषु।
१६ =स्वस्थानं गतेषु।

**दूरीकृत्याणुमान्न[१]त्वा श्रीवत्साङ्कं करण्डकम्।**
**मुक्त्वाग्रे कुशली राम इत्यूचे ताम[२]दश्छलम्[३]॥५९॥[२६५]**

**न वेत्युद्घाट्य तद्रामनामाङ्कां वीक्ष्य मुद्रिकाम्।**
**स्वैकगम्यञ्च[४] पत्रार्थं निश्चित्यासौ मुदालपत्॥६०॥[२६६]**

**मे त्वं पितेति सोऽवादीन्नैवं त्वं स्वामिनी मम।**
**शक्नोम्यद्यैव नेतुं त्वां परं नाज्ञात्र मे प्रभोः॥६१॥[२६७]**

**हत्वारिं नेष्यतां शस्तां[५] तच्छ्रिया[६] भोज्यमम्ब तत्।**
**ओमित्युक्त्वा[७] तया मुक्तः[८] प्रगे[९] द्रागेत्य स प्रभुम्॥६२॥[२६८]**

**सीता दृष्टेति पृच्छन्तं नत्वा दृष्टेत्युवाच सः।**
**तस्मै सैनापत्यमधिराज्यं चेन्द्रतुजे[१०] ददौ॥६३॥[२६९]**

**सो[११]ऽमुक्ता[१२] गदम[१३]त्र त्वं सीतां याच्योऽनुकूल्य सः[१४]।**
**बिभीषणेन भोज्या च से[१५]त्युक्त्वा स खगेड्भटम्[१६]॥६४॥[२७०]**

---

१ =त्रसरेणुमात्रगात्रकरणात्स्ववर्गैर्दत्ताणुमत्सञ्ज्ञः।
२ =सीतां प्रति।
३ =कपटम्। एषा रावणकृता माया।
४ =आत्मनैव बोधतृतीयविषयत्वात्।
५ =प्रशस्तां त्वाम्।
६ =रावणसम्पदा सह।
७ =अङ्गीकृत्य।
८ =विवर्जितः।
९ =प्रभाते।
१० =सुग्रीवाय।
११ =अणुमान्।
१२ =पुनः प्रेषितः।
१३ =अहमेवं कथयिष्यामि।
१४ =रावणः।
१५ =लङ्का भोज्या भविता।
१६ =मनोवेगादिविद्याधरभटचतुष्टययुक्तं रावणं प्रति गत्वा।

**गत्वारिस्ते[१]न साम्नोक्तो योग्यं मे सो[२]ऽवगम्य माम्।**
**स्त्रीरत्नं स्वीचकारैतु मां जित्वैतन्न[३]यत्विति॥६५॥[२७१]**

**ध्रुवं श्वाक्षिप्त[४] उत्कुप्य[५] भटैर्निर्वासितो[६]ऽमुना।**
**मुक्तो बिभीषणेनार्यां[७] पारयित्वा[८]म्बयैत्य सः॥६६॥[२७२]**

**तद्दण्डे[९]ऽद्रढयद्रामं प्रस्थाया[१०]थ शरद्य[११]।**
**निर्मूल्य[१२] वालिं नीत्वात्र सुग्रीवं तत्पदे[१३] व्यधात्॥६७॥[२७३]**

**सिद्धप्रज्ञप्तिना[१४] सो[१५]ऽपि भक्तविद्यैः[१६] खगैर्वृतः।**
**सज्जैर्भूखेचरचयैर्यो[१७]ऽधृष्यः[१८] शत्रुमध्यगात्॥६८॥[२७४]**

**नानिच्छन्तीं[१९] भजेया[२०]न्यस्त्रीमित्येकव्रतस्य ते।**
**नोऽग्रवंश्यस्य सीता सुता युक्तात्मीया वाञ्छितुम्॥६९॥[२७५]**

---

१ =रावणः।
२ =रामः मां ज्ञात्वा स्त्रीरत्नं स्वीचकार। तर्हि एतु आगच्छतु रामः।
३ =स्त्रीरत्नम्।
४ =हनुमता भेददण्डवाग्भिस्तिरस्कृतः शुनकवत्।
५ =उत्कृष्टं क्रुध्वा।
६ =सभायाः सगलग्रहं निष्कासितः।
७ =सीताम्।
८ =अष्टमदिने मन्दोदर्या कृत्वा पारणां कारयित्वा।
९ =रावणो दण्डैकसाध्यः।
१० =रामस्य प्रयाणं कारयित्वा।
११ =लक्ष्मणः।
१२ =खदिरवने हत्वा।
१३ =वालिराज्ये।
१४ =तत्कालसाधितप्रज्ञप्तिविद्येन सुग्रीवेण।
१५ =रामः।
१६ =तत्क्षणाराधितपूर्वसिद्धविद्याकैः।
१७ =कोटिचतुरशीतिलक्षसङ्ख्यैर्भूगोचरैः। अर्धाष्टकोटिचतस्रसङ्ख्यैश्च खैचरैर्बलैर्वृतः।
१८ =रामः।
१९ =विभीषणेनेति उक्तः।
२० =पञ्चमी। ईय। अहं नोपभुञ्जीय।

**तद्रामायार्प्यतां नीत्वेत्याचक्षाणः[१] सुहृत्क्रु[२]धा।**
**भ्रात्रा निर्वासितोऽभ्येत्य श्रितो रामं बिभीषणः॥७०॥[२७६]**

**अथोपाब्धि[३]निवेष्टेन रामेणानुमतो[४]ऽणुमान्।**
**कपिसैन्यैर्वनं भङ्क्त्वा दग्ध्वायातो बहिः[५] पुरम्॥७१॥[२७७]**

**तत्सुग्रीवाप्तविद्यौ तल्लङ्घिताब्धी[६] बला[७]सुतौ।**
**आवास्या[८]प पुरं वीरेण[९] द्विषा सिद्धिमास्थताम्[१०]॥७२॥[२७८]**

**ततोऽरिणा[११] कृतासह्यरणेनेत्यक्षिप[१२] क्रुधा।**
**चक्रमादाय तच्छीर्षञ्चिच्छेदोच्चैर्लक्ष्मणोऽनु तत्[१३]॥७३॥[२७९]**

**प्रीत्याप्तैर्यो[१४]जितो रामः सीतयारिपदे न्यधात्।**
**बिभीषणं सुरैर्गाङ्गैर[१५]भिषिक्तश्च[१६] लक्ष्मणः॥७४॥[२८०]**

**कोटिकाख्यशिलोद्धृत्या तुष्टाद्दि[१७]व्यासिमा[१८]प्य सः।**
**स्वानन्दात्साग्रजो जित्वा दिशोऽयोध्यां श्रितोऽतपत्॥७५॥[२८१]**

---

१ =भाषमाणः।
२ =भ्राता विभीषणः।
३ =सागरतटे।
४ =देवाहं गत्वा उपरि भवामीति विज्ञप्तेर्नितरामनुज्ञातः।
५ =बाहिरिकां लङ्काम्।
६ =ताभ्यां सुग्रीवहनुमद्भ्यां प्रज्ञप्तिकृतविमानेनावतारितसमुद्रौ।
७ =सुबलादेवी।
८ =सैन्यं बहिर्मुक्त्वा।
९ =सुभटेन शत्रूणां द्विषा हनुमता कृत्वा।
१० =रावणमादित्यपादशैलेन्द्रे विद्याः साधयन्तं विघ्नितवन्तावित्यर्थः।
११ =रावणेण(न)।
१२ =क्षिप्तम्।
१३ =चक्रमादाय।
१४ =सुग्रीवविभीषणादिभिः।
१५ =गङ्गाजलैः।
१६ =रामश्चाभिषिक्तः।
१७ =हर्षं प्राप्तादेवात्।
१८ =सौनन्दनाम।

**एकदा सपरीवारः[१] शिवगुप्तजिनाद्बलः।**
**धर्मं श्रुत्वा सानुजोऽभूदिष्टिमाप्य प्रभायुतः[२]॥७६॥[२८२]**
**ततः कतिपयाब्दान्ते साकेतेऽन्यानुजौ[३] प्रभू[४]।**
**कृत्वा काशीं गतौ पुत्रपौत्राधस्तौ[५] ननन्दतुः॥७७॥[२८३]**
**दृष्टस्वप्नत्रयो[६] मृत्वा महारोगेण लक्ष्मणः।**
**गतो रावणवच्छवभ्रं तच्छोकान्ते प्रबुद्धधीः॥७८॥[२८४]**
**लाक्ष्मणौ[७] पृथिवीचन्द्रे राज्यं न्यस्याजितं जये।**
**सीतात्मजेऽष्टमे यौवराज्यञ्च मिथिलैश्यवत्[८]॥७९॥[२८५]**
**साकेतमेत्य सिद्धार्थवने श्रित्वा बलस्तपः।**
**शिवगुप्तजिनात्सिद्धः सम्मेदेऽणुमदादियुक्॥८०॥[२८६]**
**बिभीषणादयश्चानुदिशं ययुस्तपोबलात्।**
**सीताच्युतं गतान्ये तु[९] यथास्वं स्वर्गमासदन्॥८१॥[२८७]**

॥श्रीमुनिसुव्रततीर्थकर-हरिषेणचक्रि-राम-लक्ष्मण-रावणचरितोत्तरं विंशम्॥२०॥

**देशेऽभूदत्र[१०] कौशाम्ब्यां सिद्धार्थः[११] श्रावकोत्तमः।**
**श्रुत्वा स्वतातसंन्यासं[१२] महाबलजिनादसौ॥१॥[२८८]**

---

१ =सीतासुग्रीवादियुक्तः।
२ =रामः इष्टिम् आप्य प्रभया तेजसा युतोऽभूत्।
३ =भरतशत्रू(त्रु)घ्नौ।
४ =स्वामिनौ।
५ =सेवितौ।
६ =मत्तेभभग्नवटो राहुग्रस्तेन्दोर्भूपातः प्रासादैकदेशभङ्गश्च। तत्वा(त्रा)द्येन लक्ष्मणस्य महारोगेण मरणम्, द्वितीयेन सौख्यविनाशः, तृतीयेन रामप्रव्रज्या च पुरोहितेन रहस्युक्तः।
७ =लक्ष्मणस्यापत्यं लाक्ष्मणिः तस्मिन्।
८ =मिथिलाधिपत्ययुक्तम्।
९ =देव्यो राजानः कुमाराश्च सह दीक्षिताः तु पुनः श्रावकीभूतौ शिवगुप्तजिनेन रामे प्रतिबोधिते गृहीतसंयमौ। पृथिवीचन्द्राजितं(त)जयौ।
१० =भरते।
११ =राजा।
१२ =पार्थिवाख्यपितुर्मुनेर्मरणम्।

**संन्यस्य वध्वा नामान्त्यं भुक्त्वा शर्मापराजिते।**
**मिथिले[१]शस्य भूत्वाहं[२] विजयाख्य[३]स्य तुग् महीम्॥२॥[२८९]**

**भुक्त्वा मेघागमे रन्तुं गजारूढो वनं व्रजन्।**
**नत्वा सौधर्मदेवाभ्यां[४] नभःस्थाभ्यामितीरितः॥३॥[२९०]**

**आवाभ्यां वत्सकावत्यामिहा[५]र्हदपराजिता।**
**श्रुत्वाद्य भावितीर्थेशं देव! त्वां द्रष्टुमागतौ॥४॥[२९१]**

**तच्छ्रु[६]त्वा त्यक्तराज्योऽसौ तपसा प्राप केवलम्।**
**तीर्थं प्रवर्तयामास नमिमेनं नमाम्यहम्॥५॥[२९२]**

**द्वीपेऽत्रैरावते जातः श्रीपुरेशो वसुन्धरः।**
**पद्मावती प्रियामृत्योर्वरवर्मजिनान्तिके॥६॥[२९३]**

**स संयम्य महाशुक्रं गतः कौशाम्ब्यधीशिनः।**
**विजयस्य सुतो जातो जयसेनो रथाङ्गधृत्[७]॥७॥[२९४]**

**सौधाग्रस्थः सशब्दोल्कापातं[८] तप्त्वा तपो जिनात्।**
**वरदत्ताज्जयं तेऽभूद्देवः प्राशोपवेशनः[९]॥८॥[२९५]**

॥श्रीनमिनाथ-जयसेनचक्रिचरितावसानमेकविंशम्॥२१॥

**विन्ध्येऽत्र मगधे जातो भिल्लो भार्यास्य वागुरा।**
**विमलामलबुद्ध्याख्यौ चारणौ मारयंस्तदा॥१॥[२९६]**

---

१ =वङ्गदेशे।

२ =अहं शब्देनात्र अहमिन्द्र एव।

३ =बप्पिलागर्भे पुत्रः।

४ =जन्मनो द्वितीयदिने समवसरणगताभ्याम्।

५ =जम्बूद्वीपे स्थितायाम्।

६ =देववचनम्।

७ =चक्री।

८ =वीक्ष्य।

९ =अमृतभोजी।

**भक्तोऽनयो राजगृहे श्रेष्ठी वृषभदत्तकः।**
**तयेत्युक्त्वा निषिद्धोऽसौ जातौ तौ श्रावकावुभौ॥२॥[२९७]**

**वल्मीके तुम्बकफलं गृह्णन् दष्टोऽहिनान्यदा।**
**निदानेन मृतः सोऽभूत्तस्यैव श्रेष्ठिनोऽङ्गजः॥३॥[२९८]**

**इभ्यकेतुः स कनकप्रभां तन्नृपजां[१] भजन्।**
**तद्वृतो[२] दत्त[३]तद्राज्यं ना[४] कुक्षिप्तकरा[५] शुचा॥४॥[२९९]**

**वागुराथाहिना दष्टा मृत्वा तत्स[६]चिवोऽभव।**
**त्रयो[७]ऽपि तपसा[८] जातास्ते सौधर्मे सुरोत्तमाः॥५॥[३००]**

**पुष्करार्धापरे प्रत्यग्ग[९]न्धिलायां ततो[१०]ऽभवन्।**
**खगाड्यु(ढ्यु)दक्तटे सूर्यप्रभेट्सूर्यप्रभात्मजाः[११]॥६॥[३०१]**

**चिन्तामनश्चपलगत्याख्या[१२] वेगपणे जिताम्[१३]।**
**तपःश्रितां प्रीतिमती मनुते[१४]ऽथ तपोऽभजन्॥७॥[३०२]**

**सामानिकास्तु[१५] माहेन्द्रे चिन्तागतिपुरस्सराः।**
**द्वीपेऽत्र गन्धिलासिंहपुरेड् जातोऽपराजितः[१६]॥८॥[३०३]**

---

१ =जितशत्रुनाम्नो राजगृहनृपस्य पुत्रीं परिणीतः।
२ =तया स्वयंवरीकृत्य वृतः।
३ =जितशत्रुराजेन प्रव्रजता मगधाधिपत्यं दत्तं भजन्। भजति।
४ =वल्मीकः।
५ =भर्तृवियोगशोकेन वागुरा।
६ =इभ्यकेतुमन्त्री।
७ =इभ्यकेतुः, कनकप्रभा, वागुराचरः सचिवः।
८ =मन्दिरस्थविराचार्यात्पूर्वभवं श्रुत्वा गृहीतेन तपसा।
९ =पश्चिम(मः)।
१० =सौधर्मात्।
११ =सूर्यप्रभनगरस्य राजा सूर्यप्रभस्तस्य राज्ञी धारिणी तस्याम्।
१२ =इभ्यकेतुकनकप्रभामन्त्रिचराः क्रमेण त्रयो भ्रातरः। चिन्तागतिमनोगतिचपलगतयः।
१३ =प्रतिज्ञायां सर्वेषु विद्याधरेषु चिन्तागतिनैव तां जिताम्।
१४ =दृष्ट्वा तां निमित्तीकृत्य।
१५ =यूयं वयं च जाताः।
१६ =भवान् त्वम्।

श्रुत्वान्यदा[१] समं पित्रा[२] सिद्धं विमलवाहनम्।
तां तदर्चां[३] वीक्ष्य भोक्ष्य यित्यागूं[४] संश्रितो नृपः॥९॥[३०४]

तदा शक्राज्ञया यक्षपतिर्विमलवाहनम्।
तस्य सन्दर्शयामास साक्षात्कृत्वा महाशुभः॥१०॥[३०५]

नन्दीश्वराह्निकं कृत्वा धर्मं स्वान्तःपुरं ब्रुवन्।
चैत्यालयेऽनुजसुरौ[५] खगीभूतौ तपःश्रितौ॥११॥[३०६]

चारणावागतौ दृष्ट्वामितादिगतितेजसौ।
प्राच्य दृष्टौ[६] युवां क्वापीत्युक्तवानादिमो गणी॥१२॥[३०७]

प्रागुक्तं[७] मासमात्रायुर[८]थ संश्रावितो[९]ऽर्हतः।
इष्ट्वा[१०] द्वाविंशतिदिनकृतप्रायोपवेशनः॥१३॥[३०८]

जातोऽच्युतेन्द्रोऽथ नृपः सुप्रतिष्ठो[११]ऽत्र हास्तिने।
यशोधरर्षिदानाप्तपञ्चाश्चर्यः श्रितस्तपः॥१४॥[३०९]

सुमन्दिराज्जिनादुल्कापाते[१२] ख्यातो[१३]ऽन्त्यनामयुक्।
मृत्वा समाधिना चाभूज्जयन्ते लवसत्तमः[१४]॥१५॥[३१०]

---

१ =फाल्गुननन्दीश्वरपर्वणि।
२ =अर्हद्दासेन सह।
३ =तयोरर्हद्दासविमलवाहनयोर्मूर्तिम्।
४ =प्रतिज्ञामाश्रितः।
५ =मनोगतिचपलगतिचरौ।
६ =मया पूर्वं किं दृष्टौ वा।
७ =स्वयम्प्रभाख्यार्हद्भट्टारकेण कथितम्।
८ =भवान् त्वम्।
९ =ज्ञापितः।
१० =अष्टदिनानि जिनान् पूजयित्वा।
११ =जातः।
१२ =सति।
१३ =प्रसिद्धः।
१४ =देवोत्तमः।

**हरिवंशेऽन्धककृष्णेर्मार्कण्डेयान्वयेऽग्रतुक्[१]।**
**समुद्रविजयः सूर्यपुरेड् नेमिः स तत्सुतः[२]॥१६॥[३११]**
**द्वारवत्यामभूत्पाणिग्रहे[३] बुद्धो मृगेक्षणात्।**
**तं[४] प्रव्रज्याप्तकैवल्यं कृततीर्थं नुमः शिवम्॥१७॥[३१२]**
**भिल्लेभ्यकेतू सौधर्मदेवचिन्तागतीष्टमाहेन्द्रः[५]।**
**अपराजितोऽथाच्युतेन्द्रः सुप्रतिष्ठो जयन्तजो नेमिः॥१८॥[६] [३१३]**
**शैले छाये क्षणाद्द्वाभ्यां नीतो भाविपिता[७] तपः।**
**सशङ्खः सर्वनिर्नामा स्वयम्भूदर्शनात्कृतः[८]॥१९॥[३१४]**
**निदानस्तपसा प्राप्तो महाशुक्रं ततो बलः।**
**पद्मः शङ्खचरः सूर्यपुरेऽभूद्वसुदेवतः॥२०॥[३१५]**
**रोहिण्यां[९] कृष्णो[१०] देवक्यां मथुरायां हरिर्ब[११]भौ।**
**तद्द्विडासीज्जरासन्धो[१२] ब्रह्मदत्तोऽथ चक्रभृत्॥२१॥[३१६]**

॥अथ कंसकथासङ्ग्रहः॥

**मा भोजयतु को[ऽ]पीममिति[१३]वारितमाथुरः[१४]।**
**उग्रसेनो वसिष्ठ[१५]र्षिं मासानशनपारणे॥२२॥[३१७]**

---

१ =दशानां पुत्राणाम् आद्यो दशार्हः।
२ =शिवदेव्यामभूत्।
३ =सति।
४ =नेमिं शिवं सिद्धं नुमः।
५ =इष्टः पूजितोऽन्यदेवैर्माहेन्द्रेण इष्टो वा।
६ छन्दो न ज्ञायते। सं.
७ =नन्दि नामा द्विजः।
८ =विमलतीर्थे स्वयम्भू नाम वासुदेवदर्शनात्कृतविद्वानः।
९ =बलः।
१० =नवमवासुदेवस्य नाम कृष्णः।
११ =निर्नामचरो हरिः।
१२ =मगधदेशे राजगृहे।
१३ =अहं भोजयिष्ये।
१४ =मथुरालोकः।
१५ =गङ्गागन्धवतीसङ्गमे जठरकौशिकाख्यतापसपल्लीनायको वसिष्ठतापसः।

**भोजयिष्ये शिखीभेन्द्रजरासन्धेशशासनैः।**
**त्रिविघ्नतः[1] स्वयं नास्मै दत्ते भिक्षामसौ परान्॥२३॥[३१८]**

**निषिद्ध्यतीति लोकोक्तेस्तृतीये मास्यलब्धभुक्[2]।**
**क्रुध्वा मृतो निदानेन सोऽभूत्कंसो नृपात्मजः[3]॥२४॥[३१९]**

**दुर्दौहदो[4] दुराकारो[5] ज्ञातः क्रौर्यः[6] प्रवाहितः।**
**कालिन्द्यां कंसमञ्जूषाक्षिप्तोऽसौ शौण्डभार्यया[7]॥२५॥[३२०]**

**कौशाम्ब्यामुद्धतो जातः कुमारोऽन्यतुजो[8] रुजन्[9]।**
**निर्वासितः पत्तिवृत्या(त्त्या) वसुदेवमसेवत॥२६॥[३२१]**

**जरासन्धेन राज्यार्धतरां[10] जीवद्यशोभिधाम्।**
**दातुं मतां[11] जितवते[12]ऽजय्यं[13] सिंहरथं[14] रिपुम्॥२७॥[३२२]**

**प्रदित्सोर्व[15]सुदेवश्च वीक्ष्य तां दुष्टलक्षणाम्।**
**जितो मत्पत्निनानेन स कंसेनेति बाधितः[16]॥२८॥[३२३]**

---

१ =त्रिवारविघ्नात्।
२ =सन् वसिष्ठः।
३ =उग्रसेनपुत्रः।
४ =भर्तृहृदयमांसं खादामीति दुष्टदौहृ(ह)दकारकः।
५ =ओष्ठदशननिष्ठुरालोकनभ्रुकुटीकरणादिः।
६ =निर्दयः।
७ =मन्दोदर्या।
८ =परपुत्रात्।
९ =पीडयन् चपेटामुष्टिदण्डाद्यैः।
१० =राज्यार्धेन कृत्वा वरं सातिशयाम्।
११ =प्रतिज्ञाताम्।
१२ =सुभटाय।
१३ =दिग्जयावशेषे आत्मना जेतुमशक्यम्।
१४ =पोदनेशम्।
१५ =जरासन्धस्य कन्यां दातुमिच्छोः सिंहरथमर्पयामास।
१६ =बाधा जातास्येति बाधितः। बद्ध इत्यर्थः।

**तेन[१] मन्दोदरीप्राप्तमञ्जूषापत्रवाचनात्।**
**ज्ञातवंशाय द्राक्त[२]स्मै सराज्यार्धां सुतामदात्॥२९॥[३२४]**

**गृहीत्वा मथुरां बध्वा(द्ध्वा) प्रक्षेपो[३]द्रिक्तवैरतः।**
**पितरौ गोपुरे न्यस्य कृत्वा सूर्यपुरात्प्रभुम्॥३०॥[३२५]**

**वसुदेवं दैवसेनीं देवकीमनुजां निजाम्।**
**स्वीकार्य[४] --[५] भूत्यामा मुदास्ता[६]शामना ददौ॥३१॥[३२६]**

**अतिमुक्तमुनिर्जातु भिक्षार्थं गृहमागतः।**
**देवकी तेऽनुजा साधो पुष्पजातेन वाससा॥३२॥[३२७]**

**स्वेहां[७] व्यनक्त्यनेनेति तत्पत्न्या[८] नर्मणोदितः।**
**तामूचेऽस्याः सुतो रण्डां त्वां कर्तेति निशम्य तत्[९]॥३३॥[३२८]**

**तत्र[१०] च्छिन्ने तथैतेन कर्ताप्यपितृकामिति।**
**तच्छ्रुत्वा मर्दिते पद्भ्यां तत्रैतेन महीमिमाम्॥३४॥[३२९]**

**भोक्ता त्रिखण्डामिति तच्छ्रु[११]त्वा कंसेन तन्मु[१२]खात्।**
**देवक्याः स्वगृहे सूतिं याचितोऽमंस्त तत्पतिः[१३]॥३५॥[३३०]**

---

१ =जरासन्धेन।

२ =शीघ्रम्।

३ =यमुनायां बालक्षेपाधिका(?)।

४ =विवाहविधिना ग्राहयित्वा।

५ छन्दोभङ्गेन अक्षरद्वयं विस्मृतमिति ज्ञायते। स्वीकार्य च विभूत्यामा इति भाव्यम्? सं।

६ =त्यक्तवाञ्छः कंसः।

७ =आत्मचेष्टाम्।

८ =कंसभार्यया। जीवद्यशसा।

९ =वाक्यम्।

१० =तस्मिन् वस्त्रे।

११ =मुनिवचनम्।

१२ =जीवद्यशसः।

१३ =देवक्याः पतिः वसुदेवः।

देवकीवसुदेवाभ्यां भोजयित्वान्यदा मुनिः।
दीक्षा नौ स्यान्न वेत्युक्तः सोऽवोचत्सप्त वां[१] सुताः॥३६॥[३३१]

भवितारो[२] यमा[३]स्तेऽत्र त्रयोऽन्यत्रातिवर्धिताः।
सेत्स्यन्ति[४] पश्चिमश्चार्धचक्री भावीति भाववित्[५]॥३७॥[३३२]

अलकाभद्रिलश्रेष्ठिन्नियमैर्नैगमर्षिणा[६]।
सद्यो जातमृतैरिन्द्रादेशेन परिवर्तनात्[७]॥३८॥[३३३]

त्रीन् स्वस्रीय[८]यमान्कंसः शिलायां सोऽवधीक्र(त्क्र)[९]मात्।
सप्तमे मास्यतोऽज्ञातः[१०] कृष्णोऽथ स्वगृहेऽजनि॥३९॥[३३४]

पोष्टुं नन्दगृहे कृष्णं हरन्[११] सीरी धरन् पिता।
छत्रं गोभूताप्त[१२]देवीशृङ्गोद्यन्मणिदीपिका॥४०॥[३३५]

यान्तौ निशीथे[१३] तत्पादस्पर्शोद्घाटितगोपुरौ।
सम्भ्रान्तोक्त[१४] तदर्थोग्रसेनाशीर्वादमोदितौ॥४१॥[३३६]

यमुनादत्तपन्थानौ सद्यो जातात्मजा[१५]र्पणम्।
नन्दं दृष्ट्वाभ्यायान्तं तं पृष्ट्वा ज्ञाततदर्थकौ॥४२॥[३३७]

---

१ =युवयोः।
२ =भविष्यन्ति।
३ =युगल(लानि)।
४ =मोक्षं यास्यन्ति।
५ =चित्तजो मुनिः।
६ =नाम्ना देवेन।
७ =देवक्या अग्रे अलकासुतान्मृतान्मुक्त्वा देवकीपुत्रान् जीवतोऽलकाग्रे स्थापनात्।
८ =भगिनीपुत्रान्।
९ =द्वौ द्वौ पुत्रौ जातौ सद्यः शिलापट्टेनाघातयत्।
१० =कंसेन न ज्ञातः।
११ =नीयमानः।
१२ =वृषभाकारेण प्राप्ता।
१३ =रात्रौ।
१४ =अतर्कितोपनतगोपुरोद्घाटनक्षुभितोक्तः।
१५ =पुत्री।

**तस्मै दत्वा स्वडिम्भं तं डिम्भां लात्वा गतौ गृहम्।**
**तदैत्य कंसस्तां वीक्ष्य भुग्ण(ग्न)[१]नासा व्यधाद्बलात्॥४३॥[३३८]**

**सा तपःस्था स्थिता[२] विन्ध्ये व्याघ्रजग्धा[३]गमद्दिवम्।**
**हस्ताङ्गुलित्रयी तस्याः कृत्वाज्ञैर्वि[४]न्ध्यवासिनी॥४४॥[३३९]**

**पृष्टो दृष्ट्वा महोत्पातान् कंसेन वरुणोऽब्रवीत्।**
**जातस्तेऽरिरि[५]ति श्रुत्वा तं[६] ध्यायन् पूतनादिभिः॥४५॥[३४०]**

**प्राक्सिद्धाभिस्तद्भवेष्टफलाभिः सप्तभिः श्रितः।**
**स[७] तद्गिरा[८] विभङ्गेन[९] तं[१०] ज्ञात्वाथ विकृत्य[११] ताः॥४६॥[३४१]**

**मात्रनः[१२] कुकुभद्वन्द्वतालरासभिकार्वताः[१३]।**
**जिघांसत्यः प्रतिहताः स्वा[१४]शक्तिं कंसमूचिरे॥४७॥[३४२]**

**द्रष्टुं स्वविक्रमं[१५] हन्तुं रौद्रकृष्णवृषाकृतेः।**
**आयातोऽरिष्टदेवस्य जातु ग्रीवां बभञ्ज सः॥४८॥[३४३]**

**तच्छ्रु[१६]त्वा गोमुखीनामोपवासच्छद्मनाथ तम्।**
**पितरौ स्मार्चतोऽसिञ्चद्बलश्चाम्बां क्षरत्कुचाम्॥४९॥[३४४]**

---

१ =वक्र(क्रम्)।
२ =स्थानयोगस्थिता उद्ध(ध्र्व)कायोत्सर्गेण स्थिता।
३ =भक्षिता।
४ =व्याधजनपदैर्देवतेति भणित्वार्चिता।
५ =रिपुः।
६ =अरिं चिन्तयन् कंसः।
७ =कंसःश्रितः।
८ =कंसवचनेन।
९ =मिथ्यावधिना।
१० =रिपुं कृष्णम्।
११ =विक्रियां प्राप्ताः।
१२ =जसो(यशो)दारूपेण विषस्तनी पूतना।
१३ =अर्वता शब्दः आकारान्तोऽत्र।
१४ =तं हन्तुमसामर्थ्यमस्का(स्मा)कम्।
१५ =हरिपराक्रमम्।
१६ =वृषग्रीवाभञ्जनम्।

**गोवर्धनं महावृष्टौ छत्रीचक्रेऽन्यदा गवाम्।**
**सोऽहिशय्याधनुः शङ्खान्पूर्वदेवगेहजान्स्व[१]यम्॥५०॥[३४५]**

**दृष्ट्वा साध्यान्[२] ददाम्येषां[३] साधयित्रे सुतामिति।**
**कंसे तद्घोषितेऽसौ[४] तान् भान्वन्तेऽसाधयन्महान्॥५१॥[३४६]**

**ततः कंसभयान्नष्टे गोष्ठे केनाप्यनुद्धृतम्।**
**तत्रोद्धृत्य हरिः शैलस्तम्भं लेभे जनाशिषः॥५२॥[३४७]**

**प्रत्यागते व्रजे भङ्क्त्वा महानागं[५] पितुर्गिरा।**
**कंसं सहस्रपत्राणि स सरोजान्युपाहरत्[६]॥५३॥[३४८]**

**अथाहूतो नृपेणामामल्लैर्नन्दो व्रजन् गजम्।**
**भङ्क्त्वोत्खा?तरदा[७]हत्य कृष्णेनोक्तजयोद्युतत्॥५४॥[३४९]**

**गत्वा सभां नियुद्धेऽसौ तं प्रायुङ्क्त नृपाज्ञया।**
**सोऽपि रङ्गं प्रविश्याद्धा[८] चाणूरं कंसमप्यहन्॥५५॥[३५०]**

**स नाकि[९]मुक्तपुष्पौघो विपाश्य[१०] पितरावरेः[११]।**
**नम्रैर्नृपैर्वृतः प्रीतैः स्वैश्च[१२] सूर्यपुरं ययौ॥५६॥[३५१]**

---

१ =मथुरास्थापनार्थं जिनालयान्ते पूर्वदिशि पुरदेवतागृहे समुत्पन्नान्।

२ =स्ववशीकृतान्नृपान् प्रति कंसे घोषिते सति।

३ =रत्नानाम्।

४ =हरिः।

५ =कालीनागम्।

६ =नीतवान् कंसं प्रति।

७ =दन्तेन।

८ =त्यक्तं झटिति वा।

९ =नाकिभिर्देवैः।

१० =बन्धनं छित्त्वा(त्वा)।

११ =कंसस्य।

१२ =स्वजातिभिः।

**तज्जी[१]वद्यशसः श्रुत्वा मुक्तान्[२] हन्तुं यदून् सुतान्।**
**ज्ञात्वा चक्री जितान् कालयवनं प्राहिणोत्स्वजम्[३]॥५७॥[३५२]**

**श्रुत्वायान्तमजय्यं तं गत्वाब्धौ यादवाः स्थिताः।**
**प्रदीप्याग्निं पृथुं वास्थान्मार्गे तत्कुलदेवताः॥५८॥[३५३]**

**वृद्धा[४] मत्पुत्रयादेवाः प्रविश्याग्निं भयान्मृताः।**
**इत्युक्तोऽरिस्तयाहंयुर्ग[५]त्वा तातं तथावदत्॥५९॥[३५४]**

**कृष्णः कृताष्टोपवासो वासायो[६]पाब्धिनैगमम्[७]।**
**आरुह्याश्वाकृतिमेनं[८] सिन्धुं सोऽखण्डयत्सु[९]रेट्[१०]॥६०॥[३५५]**

**तत्र[११] शक्राज्ञया यक्षश्चक्रे द्वारवतीं पुरीम्।**
**वसतस्तत्र कृष्णादीन्नेमिकल्याणकोर्जितान्[१२]॥६१॥[३५६]**

**कुरूवंशे हास्तिनेशाज्जातो व्यासः[१३] पराशरात्।**
**तत्पुत्रा[१४] धृतराष्ट्रोऽन्यः पाण्डुश्च विदुरोऽपरः॥६२॥[३५७]**

**धृतराष्ट्रो नरपतिवृष्णिपुत्र्यां[१५] शतं सुतान्।**
**दुर्योधनादीन् गान्धार्यां[१६] ख्यातवीर्यानजीजनत्॥६३॥[३५८]**

---

१ =कंसवधादिकम्।
२ =प्रहितान्।
३ =निजपुत्रम्।
४ =वृद्धा(द्धाः) प्राह— मत्पुत्रा यादवाश्च। अथवा हे! मत्पुत्र! हे! कालवय(यव)न!।
५ =अहङ्काराविष्टः।
६ =निवासाय स्थाननिमित्तम्।
७ =देवविशेषं सदयचरं पूर्वजन्मभ्रातरम्।
८ =समुद्रम्।
९ =विघटयति स्म।
१० =सुरस्य सदयचरस्य देवस्य स्वामी हरिः।
११ =जलधिमध्ये।
१२ =गरिष्टा(ष्ठा)न् चक्रे यज्ञः।
१३ =सत्यवतीगर्भे।
१४ =व्यासस्य पुत्राः सुभद्रागर्भजाः।
१५ =गान्धारीनाम्न्याम्।
१६ =उग्रसेनदेवसेव(न)महासेनानुजायाम्।

**काममुद्राधरे पाण्डौ कन्यां कुन्तीं गते[१] रहः।**
**जातमुद्धृत्य[२] कालिन्द्याः कर्णं[३] चम्पाधिपोऽपुषत्[४]॥६४॥[३५९]**

**युधिष्ठिरादीन्[५] सोऽनूद्वातामेवान्धकवृष्णिजाम्।**
**त्रीन् कुन्त्यां मद्र्यां नकुलः सहदेवस्तुजो[६]ऽसृजत्॥६५॥[३६०]**

**दुर्योधनादयोऽव्याजं जरासन्धमथाभजन्।**
**युधिष्ठिरादयः कृष्णं विपक्षक्षपणोद्यतम्॥६६॥[३६१]**

**मागधैः[७] सन्मणीन् राजगृहे वीक्ष्योपदीकृतान्।**
**ते चक्रिणैते[८] क्व प्राप्ता इति पृष्टा जगुः प्रभो॥६७॥[३६२]**

**मध्येऽब्धिद्वारवत्यास्ते दिव्या यदुसभर्तृका[९]।**
**तत्र[१०] वायुवशात्प्राप्तैर्दृष्टास्माभिरथोर्जिता[११]।६८॥[३६३]**

**श्रुत्वैतत्प्रभृशं क्रुद्धो युष्मान् प्रत्याह दुर्मदान्[१२]।**
**इति नारदचारोक्त्या ज्ञात्वा यान्तं निसूदितुम्[१३]॥६९॥[३६४]**

**यामोऽरिं त्वं पुरीमेतां रक्षेति स्ववचः[१४] स्मृतेः।**
**ओमित्युक्तवतः स्मित्वा नेमेर्ज्ञात्वा जयं स्मितात्॥७०॥[३६५]**

---

१ =उपभुक्तवति।

२ =कुण्डलरत्नकवचलेखपत्रयुक्तं मञ्जूषायां क्षिप्तं कुन्तीपरिजनैः।

३ =राधाकर्णग्रहणादादित्येन चम्पाधिपेन कृतकर्णसञ्ज्ञं चापुषत्।

४ =राधाख्यायै स्वपत्न्यै दत्वापुषत्।

५ =असृजत् अजीजनत्।

६ =पुत्रान् एवं पञ्च।

७ =मगधदेशजैः सांयात्रिकैः।

८ =एते मणयः।

९ =यदुना हरिणा कृत्वा सभर्तृका सनाथा।

१० =अब्धौ।

११ =गरिष्ठा।

१२ =मज्जामातरं हत्वा प्रपलाय्यात्मगोपनेन स्थितत्वामि(न्मि)थ्यागर्विणः चक्री इत्याह। एवं नारदस्य चरस्य च वचनेन ज्ञात्वा।

१३ =हन्तुम्।

१४ =स्वस्य ज्ञातेः भ्रातुः।

**कुरुक्षेत्रं गतः[१] क्षिप्रं स्वबलैरपरैर[२]रिम्।**
**हत्वा तन्मुक्त[३]चक्रेण जितदिक्सो[४]ऽविशत्पुरीम्॥७१[३६६]**
**चक्रशक्तिगदाशङ्खधनुर्दण्डासयो हरेः।**
**रुक्मिण्याद्यष्टदेवीष्ट[५]स्त्रीसहस्राणि षोडश॥७२॥[३६७]**
**रत्नमालागदासीरमुशलान्यथ सम्मिताः[६]।**
**देव्यश्चासन् बलस्याष्टौ[७] मिथः प्रीतौ सुखं स्थितौ॥७३॥[३६८]**
**जात्व[८]ब्दान्ते[९] जलक्रीडामनोहर[१०]सरोवरे।**
**सकान्तैर्यादवैश्चक्रे तत्राभून्नेमिभामयोः[११]॥७४॥[३६९]**
**संलापः सेचनादन्ते[१२] लाही[१३]दं क्षालयेति वाक्[१४]।**
**सत्यभामां प्रति स्नानवस्त्रं नेमिः स्वमक्षिपत्॥७५॥[३७०]**
**किं नागशय्यामाक्रम्य सशार्ङ्गाब्जप्रपूरणम्[१५]।**
**त्वया कार्यं[१६] यदेवं गामा[१७]दिशस्ये[१८]तदीरितः[१९]॥७६॥[३७१]**

---

१ =सन् हरिः।
२ =पाण्डवादिसैन्यैः।
३ =जरासन्धमुक्त(क्तः)।
४ =हरिः।
५ =अष्टमहादेव्यः इष्टाः पूजिताः प्रिया वा।
६ =गणिताः।
७ =बलभद्रस्याष्टौ सहस्राणि।
८ =कदाचित्।
९ =शरत्काले।
१० =नामैतत्।
११ =सत्यभामाया नेमेश्च संलापः।
१२ =जलक्रीडाविनोदावसाने।
१३ =त्वं गृहाण।
१४ =उक्त्वा।
१५ =धनुश्चटापनं शङ्खप्रपूरणम्।
१६ =किं करणीयं त्वया नेमिना।
१७ =वाचम्।
१८ =त्वं कथयसि।
१९ =वाक्यम् ईरितः प्रोक्तः।

**ततस्तयायुधागारं गत्वासौ तद[1]साधयत्।**
**तात्रिक[2]श्रुततद्वृत्तस्तस्योन्नीय[3] स्मरो[4]दयम्॥७७॥[३७२]**

**प्राप्यो[5]ग्रवंश्यं प्रार्थ्योग्रसेनं राजमतिं सुताम्।**
**वेद्यामारोपयत्कृष्णस्तयोर्मूर्द्ध्न्यार्द्रतन्दुलान्[6]॥७८॥[३७३]**

**पाण्यप्सेकक्षणे[7]ऽन्येद्युः स्वराज्ये नाशशङ्कया।**
**मृगानारुध्य वृत्या[8]र्तान् शिक्षयित्वा सरक्षकान्॥७९॥[३७४]**

**त्वद्विवाहे व्ययीकर्तुं कृष्णेनैते धृता इति।**
**तैः प्रत्यालापयन्ने[9]मिं यातमा[10]लोकितुं दिशः॥८०॥[३७५]**

**ज्ञात्वा तच्छद्म निर्विद्य सद्मैत्य स्वपुराभवान्[11]।**
**शोकार्तामम्बिकामुक्त्वा सरात्रिमतिराजकः[12]॥८१॥[३७६]**

**सहस्राम्रवणे श्रित्वा तपः षट्पञ्चवासरान्[13]।**
**नीत्वोर्जयन्ते कैवल्यं प्राप्य मोहं विहत्य सः॥८२॥[३७७]**

**प्राप्तो रैवतकोद्यानं कृष्णं तत्त्वमबूबुधत्।**
**देवकीसत्यभामाद्या गणीडिष्टां[14] कथां निजाम्॥८३॥[३७८]**

---

१ =सत्यभामोक्तं कर्मत्रयम्।
२ =तत्रायुधागारे नियुक्तः।
३ =विमृश्य।
४ =काम।
५ =तद्गृहं गत्वा।
६ =आरोपयत्।
७ =हस्तोदकसेचनसमये।
८ =वाटेन।
९ =उत्तरमकारयत्।
१० =गतं सन्तम्।
११ =पूर्वजन्मानि मातरं प्रत्युक्त्वा।
१२ =रात्रिमत्या राजसहस्रेण च सहितः।
१३ =५६ षट्पञ्चाशद्दिनानि।
१४ =गणीशा श्राविताम्।

प्रद्युम्नादिभवान् पृष्ट्वा ज्ञात्वा पृष्टो हरेः कियत्।
राज्यं भावीति तत्प्रेम्णा[१] सीरिणा नेमिरब्रवीत्॥८४॥[३७९]
द्वीपायनस्तपो लात्वा प्रेष्य[२] प्रत्येत्य धक्ष्यति[३]।
द्वारकां द्वादशाब्दान्ते मत्तयादवकोपितः॥८५॥[३८०]
हरिं जरत्कुमारोऽपि कौशाम्बीगहनान्तरे।
सुप्तं तृषार्तं वनैणभ्रान्त्या सद्यो हनिष्यति॥८६॥[३८१]
एते श्रुत्वाप्तनिर्वेदा विद्वांसः स्वाम्यनुज्ञया।
प्रद्युम्नरुक्मिणीमुख्या मौं(मौ)क्षीं दीक्षामशिश्रियन्॥८७॥[३८२]
सम्भवश्चानिरुद्धश्च तन्ना[४]शं वीक्ष्य दीक्षितौ।
प्रद्युम्नश्चाथ निर्वाणा गिरनारत्रिकूटगाः॥८८॥[३८३]
रुक्मिण्याद्याः सुसेत्स्यन्ति द्योश्च्यु[५]तास्तपसाच्युतः[६]।
घर्मातो[७]ऽत्रै[८]त्य माहेन्द्राद्बलस्तीर्थं करिष्यति॥८९॥[३८४]
नेमिः पुनर्विहृत्योर्वीं पल्लवं देशमास्थितः।
अथ भारतसङ्क्षेपो लाक्षावेश्मप्रवेशिताः॥९०॥[३८५]
कुरुभिः[९] सहजारित्वान्निर्गत्यातः सुरङ्गया[१०]।
सापदानं[११] तु द्रौपद्याः[१२] कम्पिल्यायां स्वयंवरम्[१३]॥९१॥[३८६]

---

१ =हरिस्नेहेन।

२ =देशान्तरं गत्वा पश्चादागत्य।

३ =दह भस्मीकरणे।

४ =द्वारवतीदाहादिकम्।

५ =स्वर्गात्। द्यु उकारान्तः।

६ =हरिः।

७ =प्रथमनरकात्।

८ =भरते।

९ =दुर्योधनाद्यैः।

१० =हस्तिनागपुरस्थितेन विदुदे(रे)ण कुद्दालकरान् प्रस्थाप्य नगराद्बहिर्लाक्षागृहनिर्मापणव्याजेन निर्मापितया सुरङ्गया।

११ =अद्भुतकर्मणा सह प्रविष्टाः।

१२ =द्रुपदस्य दृढरथायाः पुत्र्याः।

१३ =प्रविष्टाः।

**प्रविष्टाः पाण्डवास्तत्र विद्धराधो युवा नृपः[१]।**
**ततः पार्थात्सुभद्रायामभिमन्युरसौत्सु[२]तः॥९२॥[३८७]**

**द्रौपद्यामिषुमानाश्च[३] सूनवोऽन्वभवन् क्रमात्।**
**देशानिमान् क्षितिगुप्तं[४] भ्रान्त्वा दर्शितविक्रमाः॥९३॥[३८८]**

**द्यूतं रन्त्वा धर्मपुत्रो दुर्योधनमहीभुजा[५]।**
**जित्वा कुरून् कुरुक्षेत्रे श्रित्वापाग्म[६]थुरामभुः(भूः)[७]॥९४॥[३८९]**

**श्रुत्वा द्वारवती दाहाद्याप्यनिर्वेदमर्हतः[८]।**
**ज्ञातजन्मान्तरास्ते निग्र(र्ग्र)न्थाः शत्रुञ्जये स्थिताः[९]॥९५॥[३९०]**

**द्विट्[१०] स्वस्रीयाहतास्तप्तलोहभूषा वितेपिरे।**
**कौन्तेयास्तेऽप्यगुः सिद्धिं माद्रेयौ त्वन्तिमां[११] दिवम्॥९६॥[३९१]**

**कुन्तीसुभद्राद्रौपद्यो निर्वास्यन्त्यच्युताच्युताः।**
**प्राग्बद्धनरकायुष्कः कृष्णोऽनुप्राप्तशुद्धदृक्॥९७॥[३९२]**

**भ्रातुराप्ता[१२]न्त्यनामागाच्छुभ्रं तच्छत्रुर[१३]प्यघात्।**
**नेमौ सिद्धेऽथ साकेते चूलायां ब्रह्मणो नृपात्॥९८॥[३९३]**

**स्वर्गादेत्यसुरः कश्चिद्ब्रह्मदत्तः सुतोऽभवत्।**
**स भूत्वात्रोत्तमश्चक्री प्राविक्षत्सप्तमीं क्ष(क्षि)तिम्॥९९॥[३९४]**

---

१ =अर्जुनः।
२ =प्रसूते स्म।
३ =पञ्चप्रमाणाः।
४ =भूमौ प्रच्छन्नं यथा भवति।
५ =सह।
६ =दक्षिण(णम्)।
७ =प्रतपन्ति स्म के? पाण्डवाः। किं कृत्वा? देशान् भ्रान्त्वा।
८ =नेमेः समीपात्।
९ =आतापनयोगे स्थिताः।
१० =दुर्योधनभागिनेय(यः) कुर्यवराख्यः।
११ =सर्वार्थसिद्धिम्।
१२ =नेमेरुपदेशात्प्राप्तसम्यक्त्वः।
१३ =जरासन्धः।

**सुभानुः प्राग्द्युजश्चि[१]त्राङ्गदः खेटो द्युतुर्यभूः[२]।**
**शङ्खो महाशुक्रसुरः सीरी माहेन्द्रजो जिनेट्॥१००॥[३९५]**

**अमृतरसायनपलपचतृतीयनरकोद्भवाश्चात्र[३]।**
**यक्षोऽभून्निर्नामा महादिशुक्रोऽच्युतोऽथ घार्मोऽर्हन्॥१०१॥[३९६][४]**

॥श्रीनेमिनाथ-पद्म-कृष्ण-जरासन्ध-ब्रह्मदत्तचक्रिचरितोत्तरं द्वाविंशम्॥२२॥

**पोदनेऽत्रा[५]रविन्दस्य राज्ञो मन्त्री वरो द्विजः।**
**मरुभूतिरभूद्राज्ञा सह प्राप्तागमश्चि[६]रात्[७]॥१॥[३९७]**
**रक्ते वरुणया[८] ज्येष्ठे स्वभ्रातृकमठे स्त्रिया।**
**वसुन्धरीं भवत्कान्तां त्वद्भ्राता भजतीति सः॥२॥[३९८]**
**तामाश्वास्यान्यदा छन्नो[९] दृष्ट्वा तच्चेष्टितं स्वयम्।**
**विज्ञाप्येशं विगोप्या[१०]सौ तं शठं निरवासयत्[११]॥३॥[३९९]**
**गत्वोपसिन्धु[१२] पञ्चाग्नितपः कुर्वन्स मोहतः[१३]।**
**तेना[१४]न्यदा स्वनृपेशं वाच्य[१५] श्रित्य[१६] प्रणामिना[१७]॥४॥[४००]**

१ =सौधर्मजो देवः।
२ =स्वर्गचतुर्थे माहेन्द्रदेवः।
३ =भरतेऽर्हन्।
४ =उद्गीतिः स.।
५ =जम्बूभरते।
६ =श्रुतिशास्त्रविदित्यर्थः। राजापि प्राप्तागमः।
७ =दीर्घकालपर्यन्तम्।
८ =कमठभार्यया कथितम्।
९ =प्रच्छन्नो मरुभूतिः।
१० =खरारोहणोच्छिष्टशरावमालागलारोपणादिकं कारयित्वा।
११ =निर्धाटितः।
१२ =नदीतीरे तापसपल्ल्यां शिवतापससमीपे।
१३ =अज्ञानात्।
१४ =मरुभूतिना।
१५ =निजनृपस्य कथयित्वा। अस्मिन्नर्थेऽयं प्रयोगः चिन्त्यः।
१६ =तं कमठमाश्रित्य। अस्मिन्नर्थेऽयं प्रयोगः चिन्त्यः।
१७ =प्रणामोऽस्यास्तीति प्रणामी तेन प्रणतवता।

प्रसाद्यमानस्तं[1] क्रोधाज्जघान शिलया ततः।
मलये कुब्जकाख्याने स जातः सल्लकीवने॥५॥[४०१]

वज्रघोषो गजेन्द्रोऽस्य वशा[2]सीद् वृ(व)रुणा प्रिया।
सार्थेना[3]मारविन्दञ्च यान्तं सम्मेदमर्हतः॥६॥[४०२]

वन्दितुं तत्स[4]रस्तीरे प्रतिमायोगमास्थितम्।
सार्थं भङ्क्त्वा हन्तुकामो वत्से[5] श्रीवत्सलाञ्छनम्॥७॥[४०३]

तस्य दृष्ट्वाञ्जसा जातिस्मरी स्नेहाद्ब[6]भूव सः।
तेन प्रबोधितो[7] धर्मं श्रावकव्रतमग्रहीत्॥८॥[४०४]

तदा प्रभृत्यद्याद्विभ्यद्भग्नाः शाखाः परैर्द्विपैः।
शुष्काणि तृणपत्राणि खादन् विध्वस्त[8]मम्बु च॥९॥[४०५]

पारणायां पिबन्[9] क्षीणः पातुं वेगवतीञ्चि[10]रात्।
